दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

■ पृष्ठ-10 ■ वर्ष-5 ■ अङ्क-307 | 1 | अगस्त 26, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् श्रावणशुक्लचतुर्दशी
भाद्रपद 10 प्रविष्टांशः मङ्गलमयः भवेत्

2 सुक्खू-महोदयः अवदत्- पूर्वतन-सर्वकारस्य काले 'सहारा'-योजनायाम् अयोग्याः अपि सम्मिलिताः,

4 मोहरीदेवी-खण्डेलवाल-परिसरे संस्कृताध्ययन-केन्द्रस्य उद्घाटनं संस्कृतसप्ताहस्य शुभारम्भः

8 कामेश्वरसिंह-दरभङ्गा-संस्कृतविश्वविद्यालये समुद्घाटितः संस्कृतसप्ताहसमारोहः योग्यशास्त्राभिज्ञानामेव भवेत् विश्वविद्यालयपदेषु नियुक्तिः

## यूपीआई-व्यवस्था भारतस्य डिजिटल- परिशोधन-यात्रायाः प्रमुख-परिवर्तन-बिन्दुः वर्तते -प्रधानमन्त्री नरेन्द्रमोदी



यूपीआई इत्यनेन डिजिटल-परिशोधन-व्यवस्थायां परिवर्तनेन सह भारते दश वर्षाणि सम्पूरितानि। एषा व्यवस्था भारतस्य डिजिटल-परिशोधन-व्यवस्थायाः मेरुदण्ड-रूपेण उद्भूता अस्ति। षोडशाधिक-द्विसहस्रतमे वर्षे प्रारब्धायाः अस्याः व्यवस्थायाः व्यवहार-संख्यायां प्रायः त्रयोदश-सहस्र-गुणिता वृद्धिः सञ्जाता। अत्रावसरे प्रधानमन्त्री नरेन्द्रमोदी यूपीआई-सेवाप्रणालीं श्लाघमानः सामाजिक सञ्चारपटले अलिखत् यत् यूपीआई भारतस्य डिजिटल-परिशोधन-यात्रायाम् कश्चन महत्त्वपूर्णः परिवर्तनात्मक-बिन्दुश्च सिद्धः। वित्त-मन्त्रालयानुसारं षोडशे सप्तदशे च आर्थिक वर्षे यत्र केवलं एक-दशमलव-सप्ताष्ट-कोटि-व्यवहाराः अभवन्, तत्रैव द्विसहस्रतमस्य पञ्चविंशे षड्विंशे च वर्षे एषा संख्या समेध्य द्विषष्ट्यधिकैकशतोत्तर-चतुर्विंशतिसहस्रकोटि-व्यवहारात्मिका अजायत्।

## अद्यतनीयं सुभाषितम्

**आत्मापि चायं न मम सर्वा वा पृथिवी मम।**
**यथा मम तथान्येषाम् इति बुद्ध्या न मे व्यथा।।**

भावार्थः- हमें कभी भी यह नहीं सोचना चाहिये कि यह पृथिवी और अन्य सब कुछ मेरा हो जाए, यदि हम यह समझ जाएं कि हमारी तरह और लोग भी ऐसा ही सोच सकते हैं तो फिर हमें अपने जीवन में व्यर्थ में कष्ट नहीं उठाना पडेगा।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा

## बीजिंग-नगरे चीन-विदेशमन्त्रिणा वाङ्ङ्-यी इत्यमुना सह भारत-चीन सीमाविषये विशेष-प्रतिनिधि-वार्ता कृतवान अजित डोभालः



भारतस्य राष्ट्रिय-सुरक्षा-परामर्शदः अजित डोभालः बीजिंग-नगरे चीन-विदेशमन्त्रिणा वाङ्ङ् यी इत्यमुना सह भारत-चीन सीम्नोः विवाद-समाधानाय उभयोः देशयोः सम्बन्धानां विकासाय च विशेष-प्रतिनिधि-स्तरीय वार्तायां भागम् अगृह्णात्। इयं वार्ता अतीव महत्त्वपूर्णा मन्यते, यतोहि आगामिनि सितम्बर-मासस्य द्वादश-त्रयोदश-दिनाङ्कयोः नवदेहल्याम् आयोज्यमानस्य ब्रिक्सशिखर सम्मेलनस्य कृते चीन-राष्ट्रपतिनः शी जिनपिङ्गस्य भारत-यात्रायाः पूर्वम् इयम् आयोजिता। अस्याः वार्तायाः पूर्वं द्वि-दिवसीय यात्रायां बीजिंग-नगरं सम्प्राप्तः । श्रीडोभालः चीन-उप-राष्ट्रपतिना हान् जेङ्ङ इत्यमुना सह सौहार्द-मेलनम् अकरोत्। बीजिंग-नगरस्थेन भारतीय दूतावासेन सूचितं यत् उभयोः देशयोः शीर्ष नेतृभिः कृतस्य सहमतस्य अनुसारेण सीमा-क्षेत्रेषु शान्तेः सुस्थिरतायाश्च सुदृढीकरणाय अथ च आर्थिक-राजनीतिक-बहुपक्षीय-मञ्चेषु द्विपक्षीय-सम्बन्धानां सम्वर्धनाय उपायाः चर्चिताः। उपवेशने उप-राष्ट्रपतिना हान्-महोदयेन प्रतिपादितं यत् भारत-चीन-देशाभ्यां द्विपक्षीय-सम्बन्धाः रणनीतिक दीर्घकालिक दृष्टिकोणेन अवलोकनीयाः परिपालनीयाश्च, नेतृभ्यां निर्धारितानां महत्त्वपूर्णं सहमतीनां क्रियान्वयनं च मिलित्वा कर्तव्यम्।

## विगतेषु वर्षेषु कार्गो-कार्याणि निरन्तरं वर्धमानानि सन्ति - राममोहन नायडु



नागरिक-विमानन-मन्त्रिणा के. राममोहन नायडु इत्यमुना प्रोक्तं यत् विगतेषु वर्षेषु कार्गो-कार्याणि निरन्तरं वर्धमानानि सन्ति, यत्र प्रायः चत्वारिंशत् प्रतिशतं यावत् परिमाणं वर्धितम् अस्ति। नवदिल्ल्यां वार्ताहरैः सह वार्तालापं कुर्वन् श्री-नायडुः अवदत् यत् सर्वकारः सम्पूर्ण देशे वैश्विक मानक-वायु-कार्गो-केन्द्राणि, सौकर्यतया निर्मातुम् इच्छति। सः अवदत् यत् प्रधानमन्त्रिणा नरेन्द्रमोदिना देशे लाजिस्टिक्स्-जालस्य विस्ताराय महत्त्वं प्रदीयते। एयर्-इण्डिया-फुकेट्-दिल्ली-विमानयान-घटनायाः विषये श्री-नायडुः अवदत् यत् विमान दुर्घटना-अन्वेषण-विभागः अन्वेषणं कुर्वन् अस्ति, प्रारम्भिक प्रतिवेदनं शीघ्रमेव आगमिष्यति ।

### राजनाथसिंहः डी. आर्. डी. ओ. द्वारा विकसिताः सर्वाः पारम्परिक प्रक्षेपास्त्र-प्रणाल्याः प्रौद्योगिक्यः देशस्य अन्तः उत्पादनार्थं भारतीय-रक्षा-उद्योगाय हस्तान्तरणाय अनुमोदितवान्

रक्षामंत्री राजनाथसिंहः डी. आर्. डी. ओ. द्वारा विकसिताः सर्वाः पारम्परिक प्रक्षेपास्त्र-प्रणाल्याः प्रौद्योगिक्यः देशस्य अन्तः उत्पादनार्थं भारतीय-रक्षा-उद्योगाय हस्तान्तरणाय अनुमोदितवान्। अस्य उपक्रमस्य उद्देश्यं परिचालनक्षमतां वर्धयितुं, आयात-अवलंबनम् न्यूनीकर्तुं, देशीय मूल्यवर्धनं कर्तुं च अस्ति ।

## केन्द्रसर्वकारेण पश्चिमबङ्गाल-सर्वकारः योग्य-आवेदकेभ्यः नागरिकता प्रमाणपत्र-वितरणाय सीएए इत्यस्यान्तर्गतं अधिकृतः



केन्द्र-सर्वकारेण पश्चिम बङ्गाल-सर्वकारः नागरिकता-संशोधन अधिनियमस्य अन्तर्गतं वादश्रवणाय योग्य आवेदकेभ्यः नागरिकता प्रमाणपत्राणि दातुं च अधिकारो दत्तः। केन्द्रीय गृहमन्त्रालयेन अस्मिन् सन्दर्भे एका राजपत्र अधिसूचना प्रकाशिता। मुख्यमन्त्री सुवेन्दु-अधिकारी वार्ताहरान् असूचयत् यत् प्रायः त्रिंशत्-सहस्राधिक-द्विलक्ष-आवेदकेषु एतावता त्रयोविंशति-सहस्रजनाः योग्याः घोषिताः, तेभ्यः नागरिकता प्रमाणपत्राणि च वितरितानि । सः अवदत् यत् अवशिष्ट-आवेदनानाम् अपि शीघ्रतया कार्याचरणं भविष्यति, सम्बद्ध-मण्डलाधिकारिणां माध्यमेन च प्रमाणपत्राणि प्रदास्यन्ते। मुख्यमन्त्रिणा धार्मिक उत्पीडन-कारणात् बाङ्ग्लादेशात् समागताः जनाः सीएए-इत्यस्यान्तर्गतं नागरिकतायै आवेदनं कर्तुम् प्रार्थिताः।

# सूचना-प्रसारण-मन्त्रालयेन सप्तपुरस्काराः विजिताः

सूचना-प्रसारण-मन्त्रालयस्य प्रकाशनविभागेन अस्य षड्विंशत्यधिक द्विसहस्रतमवर्षस्य फेडरेशन् आफ़ इण्डियन् पब्लिशर्स अवार्डस् फ़ार् एक्सिलेन्स् इन् बुक् प्रोडक्शन्, इत्यस्मिन् सप्तपुरस्काराः विजिताः। विभागस्य पत्रिकाः, पुस्तकानि, हिन्दी-आङ्ग्ल-उर्दू-भाषाणां सन्दर्भ-प्रकाशनानि च विभिन्नेषु वर्गेषु स्वीकृतानि सन्ति । महानिदेशकः, प्रकाशनविभागः, डा. धीरज काकड़िया इत्येषः अवदत् यत् विभागेन प्रकाशितानि पुस्तकानि राष्ट्रियविकासेन, साहित्येन, संस्कृत्या, कलया, समकालीनविषयैः च पाठकानां आमन्त्रणे महत्त्वपूर्णां भूमिकां निर्वहन्ति ।

## संयुक्तराज्येन सर्वेभ्यः एच-1बी सीमा-अन्तर्गत आवेदनेभ्यः अतिरिक्तस्य पञ्चषष्ट्यधिक-द्विशतोत्तर-त्र्यधिकैकलक्ष डॉलर- परिमितस्य शुल्कस्य प्रस्तावः कृतः

संयुक्तराज्यस्य गृह-सुरक्षा विभागेन सर्वेभ्यः एच-1बी वीसा-आवेदकेभ्यः वर्तमान-शुल्कम् अतिरिच्य पञ्चषष्ट्यधिक-द्विशतोत्तर त्र्यधिकैकलक्ष डॉलर-परिमितस्य नूतन-शुल्कस्य प्रस्तावः कृतः। गृह-सुरक्षा विभागेन प्रकाशितायाः विज्ञप्तेः अनुसारम् इदं प्रस्तावित-शुल्कम् आवेदन-समर्पण-काले देयं भविष्यति। विभागानुसारं प्रतिवर्षं प्रायः पञ्चाशीति-सहस्रं एच-1बी सीमान्तर्गत आवेदनेभ्यः सर्वकाराय वार्षिकरूपेण प्रायः अष्ट-दशमलव-अष्ट-अरब-यूएस डॉलर-परिमितं राजस्वं सम्प्राप्स्यते ।

## ऋतुविभागस्य सचेतना

भारत-ऋतु-विभागेन पूर्वी-उत्तरप्रदेश, मध्यप्रदेश, छत्तीसगढ राज्ये च दिवसेऽस्मिन् पृथक् पृथक् स्थानेषु अतिवृष्ट्यै नारङ्ग-वर्णपरा सञ्चेतना प्रदत्ता अस्ति। आकाशवाण्या सह वार्तालापं कुर्वन्, ऋतु विभागस्य वरिष्ठः वैज्ञानिकः अखिल श्रीवास्तवः अवदत् यत् आगामिषु त्रिषु दिनेषु देशस्य प्रायद्वीपीय भागेषु निम्नवृष्टिः नैरन्तर्येण प्रचलिष्यति इति। सक्रिय-प्रावृट्कालः झारखण्ड-राज्यं निरन्तरं प्रभावयति। बङ्गाल-खात्याः उपरि निर्मितस्य न्यून-चाप-क्षेत्रस्य कारणात् अग्रिमेषु चतुर्षु दिनेषु राज्ये निरन्तरं वर्षा भवितुम् अर्हति ।

## कनाडा संयुक्तराज्यामेरिका-देशयोः आधिकारिकयात्रायां भविष्यति केन्द्रीय-वित्त-मन्त्री

केन्द्रीय-वित्त-मन्त्री निर्मला सीतारमण अद्यारभ्य कनाडा संयुक्तराज्यामेरिका-देशयोः आधिकारिक-यात्रायां भविष्यति। द्वैपाक्षिक-आर्थिक-वित्तीय सहभागितायाः सुदृढीकरणम्, निवेशसम्बन्धानां विनिमयः, वैश्विक आर्थिकप्राथमिकतासु सहकार-प्रवर्धनं च अस्याः यात्रायाः केन्द्रबिन्दवः भविष्यन्ति। श्रीमती सीतारामनः प्रमुखैः सी. ई. ओ.- इत्येतैः, अध्यक्षैः, वरिष्ठप्रतिनिधिभिः च सह निवेश-वर्तुलोत्पीठिका सम्मेलने अपि भागं ग्रहीष्यति।

### बूथ्-स्तरीय अधिकारिणः भारतस्य लोकतन्त्रस्य आधारस्तम्भाः सन्ति - मुख्य-निर्वाचनायुक्तः

मुख्य-निर्वाचन-आयुक्तः ज्ञानेश कुमारः अवदत् यत्, बूथ्-स्तरीय अधिकारिणः भारतस्य लोकतन्त्रस्य आधारस्तम्भाः सन्ति। उत्तरप्रदेशस्य द्विदिवसीय यात्रायाम् आगतः मुख्य-निर्वाचन आयुक्तः लखनऊ-नगरे प्रायः पञ्चशतं यावत् बूथ्-स्तरीय-अधिकारिभिः सह संवाद कार्यक्रमे भागम् अगृह्णात्।

# सुक्खू-महोदयः अवदत्- पूर्वतन-सर्वकारस्य काले 'सहारा'-योजनायाम् अयोग्याः अपि सम्मिलिताः, 'हिमकेयर'- योजनायां १०० कोटिरुप्यकाणां भ्रष्टाचारः



हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेश-विधानसभायां नियम-१३० इत्यस्य अन्तर्गतं स्वास्थ्य-सेवा-विषये प्रचलन्त्यां चर्चायां मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः प्रोक्तवान् यत् सर्वकारेण 'सहारा'-योजना स्वास्थ्यविभागात् सामाजिक- न्याय एवं सशक्तीकरणविभागे (अधिकारिता-विभागे) स्थानान्तरिता कृता। पूर्वतन-भाजपा-सर्वकारस्य कार्यकाले अस्यां योजनायाम् अयोग्याः जनाः अपि योजिताः आसन्। अधुना योग्यानां लाभार्थिनां परिचयाय प्रमाणीकरणाय च बाल- विकास- केन्द्र- कार्यकर्त्रीणां (आङ्गनबाडी-कार्यकर्त्रीणां) सेवाः गृह्यन्ते। सम्प्रति प्रायः त्रि-सहस्रं जनाः अस्याः योजनायाः लाभं प्राप्नुवन्ति।

मुख्यमन्त्रिणा विपक्षस्य आरोपाणां प्रत्युत्तरं यच्छता प्रोक्तं यत् हिमाचलप्रदेशे 'हिमकेयर'-योजना न स्थगिता। जनाः अस्याः लाभं प्राप्नुवन्ति। वर्षे चतुर्वारं 'हिमकेयर'-पत्राणि (कार्ड) निर्मीयन्ते। चिकित्सालये समागच्छद्भ्यः निर्धनेभ्यः योजनायाः लाभप्रदानाय वरिष्ठ-चिकित्सा-अधीक्षकाय प्राचार्याय च शत-शतं (१००-१००) पत्राणि निर्मातुम् अधिकाराः प्रदत्ताः सन्ति। सतर्कताविभागः (विजिलेंस) 'हिमकेयर'-योजना- सम्बद्धानां प्रकरणानां नशगवेषणं कुर्वन् अस्ति, असङ्गतयश्च शीघ्रमनावृताः भविष्यन्ति। 'हिमकेयर' योजनायां शत-कोटि-रूप्यकाणां भ्रष्टाचारः संजातः। पूर्वतन-भाजपा-सर्वकारस्य समये चिकित्सालयानाम् अन्यासां च देयतानां प्रायः एकसहस्र- कोटिरुप्यकाणाम् अवशिष्टभारः (एरियर) वर्तमान-सर्वकारस्य उपरि त्यक्तः। सर्वकारस्य एष एव सङ्कल्पः यत् सर्वकारीय- योजनानां लाभः केवलं वास्तविकेभ्यः पात्रजनेभ्यः एव प्रापणीयो भवेत्।

## 'सहारा'-योजनायाः लाभार्थिनां पुनः प्रमाणीकरणम्

'सहारा' योजनायाः लाभार्थिनां नूतनतया प्रमाणीकरणं विधीयते। सामाजिक- न्याय एवं सशक्तीकरण-विभागस्य माध्यमेन योजनायाः सञ्चालनेन दीनानां गम्भीर-रोग-ग्रस्तानां च जनानां समीपे साहाय्यं प्रभावकारी-रीत्या प्रापयितुं यत्नः क्रियते। अस्य लाभप्राप्तये जनाः अन्तर्जालफलके (पोर्टल) आवेदनं कर्तुं शक्नुवन्ति।

## सर्वकारीय-क्षतिपूर्तेः अपव्ययं न अनुमन्यते- मुख्यमंत्री

मुख्यमन्त्रीमहोदयः प्रश्नोत्तर-कालानन्तरं सदने वक्तव्यं दत्तवान् यत् अस्माकं सर्वकारे सर्वकारीय-क्षतिपूर्तिराशेः कस्यापि प्रकारस्य अपव्ययः न अनुमंस्यते। विधायकः राकेशकालिया पूर्व-सत्रे इमं विषयम् उत्थापितवान् आसीत्। अस्मिन् गग्गल-विमानपत्तने निर्धनेभ्यः जनेभ्यः न्यूनमूल्येन भूमिं क्रीत्वा न्यून-क्षतिपूर्ति-प्रदानस्य चर्चा कृता आसीत्। सुक्खू-महोदयेन स्पष्टीकृतं यत् तदैव स्पष्टं कृतम् आसीत् यत् केनचित् नियमान् उपेक्ष्य भूमिः क्रीता। अत्र अनामी-व्यवहारः जातः, निर्धनात् जनात् भूमिः स्वीकृता। तेन विशेष- अन्वेषण- दलस्य सङ्घटनं कृत्वा कार्यानुष्ठानस्य वार्ता प्रोक्ता आसीत्। मुख्यमन्त्रिणा विज्ञापितं यत् चतुः- सदस्यीयं दलं रचितम्। विशेष-अन्वेषण-दलेन सन्दिग्ध-अनामी-स्वामित्वस्य जाञ्चः कृतः, चतुर्षु प्रकरणेषु प्रथमा सूचना अपि पञ्जीकृता। यः प्रश्नः सदने उत्थापितः, सः न संकुचितः; अस्मिन् विषये झटिति कार्यानुष्ठानं विहितम्।

# पवित्रा मणिमहेश-यात्रा २६ अगस्त-तः, ४ सितम्बर दिनाङ्के लघु-शाही-स्नानम्; एकसहस्रं सुरक्षाकर्मचारिणः सम्भालिष्यन्ति सुरक्षाव्यवस्थाम्

हिमसंस्कृतवार्ताः- चम्बा। हिमाचलप्रदेशस्य दुष्करासु यात्रासु अन्यतमा पवित्रा मणिमहेश-यात्रा बुधवासरात् आरप्स्यते। एषा यात्रा २० सितम्बर दिनाङ्कं यावत् प्रवर्तिष्यते। यात्रा-काले २८ अगस्त दिनाङ्के रक्षाबन्धन-स्नानम्, ४ सितम्बर दिनाङ्के श्रीकृष्ण-जन्माष्टमी-पर्वणि लघुशाहीस्नानम्, १८ सितम्बर दिनाङ्के च राधा अष्टमीपर्वणि बृहत्-शाही-स्नानं भविष्यति। चौरासी-मन्दिरस्य (भरमौर) पूजकेन पण्डित- छज्जूरामशर्मणा विज्ञापितं यत् जन्माष्टमी-स्नानस्य शुभमुहूर्तः ३ सितम्बर (गुरुवासरस्य) रात्रौ २:२६ वादने प्रारप्स्यते। शुक्रवासरे समग्रं दिनं ब्रह्म-मुहूर्तः स्थास्यति, मध्याह्ने १२:१४ वादनं यावत् भक्ताः स्नानं कर्तुं शक्ष्यन्ति। राधाष्टमी-पर्व १८ सितम्बर दिनाङ्के अपराह्ने एकवादने (१:००) प्रारभ्य १९ सितम्बर दिनाङ्के सायं ३:२८ वादनं यावत् प्रवर्तिष्यते।

हड़सरतः मणिमहेशसरोवरं यावत् त्रयोदश-किलोमीटर (१३ कि.मी.) तः अधिकः पदसञ्चारः वर्तते। धनछो, सुन्दरासी, गौरीकुण्ड, शिवकुण्डसमीपे च भक्तानां निवासाय पटमण्डपानां व्यवस्था स्थास्यति। एकस्य शयन-स्थानस्य भाटकं २५० तः ३५० रूप्यकाणि यावत् भविष्यति। मणिमहेशसरोवरः समुद्रतलात् प्रायः १३ सहस्र- पाद- उन्नते स्थाने विद्यते।

## भक्तानां सुरक्षायै सहस्राधिकाः आरक्षकाः गृह-रक्षकाश्च नियुक्ताः

यात्राकाले भक्तानां सुरक्षायै सहस्राधिकाः (१,०००+) आरक्षकाः गृह-रक्षकाश्च नियुक्ताः स्थास्यन्ति। हड़सर-तः धनछो-पर्यन्तं राज्य- आपदा- प्रतिवादन- बलस्य ४०, धनछो-तः सुन्दरासी-पर्यन्तं पर्वतारोहण-उपकेन्द्रस्य (भरमौर) ६०, सुन्दरासीतः पवित्र-डलपर्यन्तं राष्ट्रिय- आपदा- प्रतिवादन- बलस्य ३० रक्षकाः नियुज्यन्ते। भरमौर, भरमाणी, हड़सर-क्षेत्रेषु प्रायः २० भारत- तिब्बत- सीमा- आरक्षणबलस्य सैनिकाः अपि सुरक्षां सम्भालिष्यन्ति। भक्तानां सौकर्याय यात्रामार्गे औषधैः, प्राणवायुपात्रैः, आवश्यक-उपकरणैश्च युक्तानि सप्त स्वास्थ्यदलानि स्थापितानि भविष्यन्ति। सुरक्षाकारणात् मैहलातः अग्रे राष्ट्रिय-राजमार्गे रात्रौ ११:०० वादनात् प्रातः ४:०० वादनं यावत्, हड़सरतः डलसरोवरं यावत् सायं ७:०० वादनात् प्रातः ४:०० वादनं यावत् यात्रा प्रतिबन्धिता स्थास्यति।

# गग्गल-विमानपत्तन-विस्थापितेभ्यः आवासेन सह आजीविकायाः संरक्षणम्; 'सान्त्वना- पुनर्वास'- कार्याय व्ययीभविष्यन्ति ६६१ कोटि-रूप्यकाणि

**हिमसंस्कृतवार्ताः- शिमला।**

काङ्गड़ा-विमानपत्तनस्य विस्तार-कारणात् प्रभावितानां परिवाराणां पुनर्वास- पुनःस्थापन-प्रक्रिया राज्यसर्वकारेण तीव्रीकृता। काङ्गड़ाक्षेत्रस्य विधायकेन पवनकाजलेन नियम-६२ इत्यस्य अन्तर्गतं विधानसभायां प्रभावित-परिवाराणां चिन्ताम् उत्थाप्य प्रोक्तं यत् गग्गल- विमानपत्तन-विस्ताराय ६० तः ७० परिवाराणां प्रायः पञ्च-पञ्च मरला-भूमिः अधिग्रहीष्यते। सः अवदत् यत् बहवः परिवाराः गतेभ्यः ५०-६० वर्षेभ्यः अत्र निवसन्ति, अधुना च विस्तार-कारणात् तेषां विस्थापनस्य स्थितिः उपस्थिता। एतादृशाः परिवाराः 'सान्त्वना-पुनर्वास'- नीतेः अन्तर्गतम् उचिते स्थाने पुनः वासनीयाः। विधायकेन एतदपि पृष्टं यत् येषां परिवाराणां समयान्तरे त्रिषु-चतुर्षु परिवारैषु विभाजनं संजातम्, किं तेभ्यः अपि अन्य- प्रभावित-परिवारवत् लाभः प्राप्स्यते।

उपमुख्यमन्त्री मुकेश अग्निहोत्री प्रत्युत्तरे न्यवेदयत् यत् गग्गलस्थितस्य काङ्गड़ा-विमानपत्तनस्य विस्तारः राज्यसर्वकारस्य महती योजना वर्तते, एतां च कार्यान्वयितुं सर्वकारः गाम्भीर्येण प्रयासं कुर्वन् अस्ति। तेन उक्तं यत् विमानपत्तन-विस्तारेण विस्थापितानां परिवाराणां हितानि अवलोक्य सान्त्वना- पुनर्वास- सम्बन्धिकार्याणि विधीयन्ते। सर्वकारः प्रभावित-परिवाराणां परिचयं प्राप्य तेभ्यः पुनर्वासस्य व्यवस्थां करोति, येन तेभ्यः आवासेन सहैव आजीविकायाः अपि संरक्षणं लभ्येत। सर्वकारपक्षतः स्पष्टीकृतं यत् परियोजनायाः प्रभावितानां हितानाम् उपेक्षा न भविष्यति, नियमानुसारेण च पात्र-विस्थापितेभ्यः पुनर्वास-पुनःस्थापनयोः सर्वाः सुविधाः प्रदास्यन्ते।

उपमुख्यमन्त्रिणा विज्ञापितं यत् भूमि- अधिग्रहणस्य अन्तर्गतम् अधुना यावत् २५७९ कोटि- रूप्यकाणाम् अधिनिर्णयः जातः, यत्र प्रायः २५०० कोटि-रूप्यकाणि लाभार्थिभ्यः वितरितानि सन्ति। केचन विषयाः अद्यापि लम्बिताः वर्तन्ते, येषु वैधानिक-प्रक्रियापूर्तेः अनन्तरं धनप्रदानं विधास्यते।

### १५७ हेक्टेयर-भूमेः भविष्यति अधिग्रहणम्

सर्वकारस्य अनुसारं काङ्गड़ा-विमानपत्तनस्य विस्ताराय प्रायः १५७ हेक्टेयर्-भूमेः अधिग्रहणं विधास्यते। प्रभावित-परिवाराणां सूचिकरणं क्रियते, योग्याः परिवाराश्च नियमानुसारं सान्त्वना- पुनर्वासयोः लाभं प्राप्स्यन्ति। सर्वकारस्य पक्षः वर्तते यत् विस्थापनस्य स्थितौ प्रभावितानाम् आवासस्य आजीविकायाश्च उभयोः संरक्षणं सुनिश्चितं क्रियते।

### ३३४९ कोटि-रूप्यकाणाम् अनुमानितः व्ययः

काङ्गड़ा- विमानपत्तन- विस्तार- परियोजनायै भूमि-अधिग्रहणाय प्रायः २६८८ कोटि- रूप्यकाणि, सान्त्वना-पुनर्वास-कार्यक्रमाय ६६१ कोटि-रूप्यकाणि व्ययीभविष्यन्ति इति अनुमानम् अस्ति। एवं समग्र-परियोजनायाः कुल-व्ययः ३३४९ कोटिरूप्यकाणि आकलितः। सान्त्वना- पुनर्वास-योजनायाः अन्तर्गतं प्रायः १९२ कोटि- रूप्यकाणि प्रसार्यन्ते, पात्रप्रकरणेषु च धनप्रदानप्रक्रिया अग्रे वर्धिष्यते।

# संस्कृत-सप्ताहस्य शुभारम्भः; ३ सितम्बर दिनाङ्के 'डाइट' मण्डीसंस्थाने भविष्यन्ति विविधाः संस्कृत-प्रतियोगिताः






**हिमसंस्कृतवार्ताः- लघ्वीकाशी मण्डी।**

हिमाचल- राजकीय- संस्कृतशिक्षक- परिषद्, जनपद- मण्डीपक्षतः शिक्षा-विभागस्य सहयोगात् सान्निध्याच्च 'संस्कृतसप्ताहः २०२६' इत्यस्य अन्तर्गतं मण्डलव्यापिनः विविधाः संस्कृतगतिविधयः प्रतियोगिताश्च आयोज्यन्ते। संस्कृतभाषायाः प्रचारप्रसाराय छात्रेषु च संस्कृतं प्रति अभिरुचिसंवर्धनाय विद्यालयस्तरे सप्ताहपर्यन्तं विविधाः कार्यक्रमाः आयोजयिष्यन्ते।

हिमाचल- राजकीय- संस्कृत- शिक्षक- परिषदः राज्यसंरक्षकः डॉ. मनोजशैलः, राज्य-वित्त-सचिवः लोकपालः, जिला-अध्यक्षः कृष्णकुमारः, महासचिवः सुरेन्द्रशर्मा, वित्तसचिवः हंसराजसांख्यायनश्च संयुक्तरूपेण अवदन् यत् श्रावणी- पूर्णिमाम् अधिकृत्य समग्रदेशे २५-३१ अगस्त-पर्यन्तं संस्कृत-सप्ताहः आचर्यते। अस्मिन् अवसरे मण्डी-मण्डलेऽपि विद्यालय-स्तरे विविधाः गतिविधयः आयोजयिष्यन्ते।

## ३ सितम्बर दिनाङ्के भविष्यन्ति मण्डल- स्तरीय- प्रतियोगिता

मण्डलस्तरीय- विविध- संस्कृतप्रतियोगितानाम् आयोजनं ३ सितम्बर २०२६ दिनाङ्के मण्डल- शिक्षा-प्रशिक्षणसंस्थाने (डाइट-मण्डी) भविष्यति। एतासु प्रतियोगितासु मण्डलस्य विविध- विद्यालयानां छात्राः भागं ग्रहीष्यन्ति।

प्रतियोगितानाम् अन्तर्गतं संस्कृत- श्लोकोच्चारणम्, संस्कृतगीतम्, संस्कृत- रूपसज्जा (वेषभूषाप्रतियोगिता), संस्कृत- सामान्य- ज्ञान-प्रतियोगिता च आयोजिताः भविष्यन्ति। रूपसज्जा-प्रतियोगितायां छात्राः कालिदास- वाल्मीकि- व्यास-भास- भर्तृहरि- माघ- भवभूति- स्वामिविवेकानन्द-दयानन्दसरस्वती- श्रीअरविन्द- प्रभृतीनां महाकवीनां महापुरुषाणाम् ऐतिहासिकानां पौराणिकानां च पात्राणां वेषभूषां धृत्वा संस्कृतेन स्व-परिचयं तेषां व्यक्तित्वं चाधिकृत्य स्व-विचारान् प्रस्तोष्यन्ति।

### विद्यालयेषु आयोजिष्यन्ते विविधाः उपक्रमाः

संस्कृतसप्ताहे मण्डलस्य विद्यालयेषु अपि सामूहिकगतिविधयः आयोजयिष्यन्ते। एतेषु 'संस्कृतं प्रतिगृहम्' (दैनिक-संस्कृत-प्रयोगः), संस्कृतप्रदर्शनी, संस्कृत-नामकरण-अभियानम्, संस्कृतसम्भाषणम्, संस्कृत- लघु- दृश्य- श्रव्यनिर्माणं, संस्कृतसप्ताह-समारोपकार्यक्रमाः प्रमुखाः सन्ति। विद्यालयानां प्रार्थना-सभासु संस्कृतवार्तावाचनम्, अद्यतनीयः विचारः, प्रतिज्ञा, अन्याश्च गतिविधयः संस्कृतमाध्यमेन आयोजयितुं यत्नः विधास्यते।

### संस्कृत-सप्ताहे उत्कृष्टकार्याय विद्यालयाः भविष्यन्ति पुरस्कृताः

संस्कृत-शिक्षक-परिषदः जनपद-अध्यक्षः कृष्णकुमारः प्रोक्तवान् यत् विद्यालय-परिसरेषु प्रधानाचार्यकक्षः, पुस्तकालयः, कार्यालयः, पाकशाला, द्वारम् इत्यादिषु प्रमुखस्थानेषु संस्कृतनामकरणस्य रम्य-फलकानि स्थापयिष्यन्ते। अनेन सहैव संस्कृतस्य इतिहासम्, भारतीयसंस्कृतिम्, विज्ञानेतरक्षेत्रेषु च संस्कृतस्य योगदानं सन्दर्भ्य प्रदर्शन्यः आयोजयिष्यन्ते।

संस्कृतसप्ताहे श्रेष्ठकार्यं सम्पादयन्तः त्रयः विद्यालयाः पुरस्करिष्यन्ते। एतदर्थं विद्यालयेन आयोजितानां कार्याणां चित्राणि, दृश्य- श्रव्य- सञ्चिकाः, वृत्तविवरणानि चाश्रित्य १ सितम्बर दिनाङ्के प्रतिवेदनं 'पीडीएफ' प्रपत्रमाध्यमेन प्रस्तोतव्यं भविष्यति। उत्कृष्ट-कार्यकर्तृभ्यः मण्डलस्य त्रिभ्यः विद्यालयेभ्यः स्मृतिचिह्नानि प्रमाणपत्राणि च प्रदास्यन्ते। प्रतियोगितासु प्रथम- द्वितीय- तृतीयस्थानं प्राप्नुवद्भ्यः छात्रेभ्यः पारितोषिकं प्रमाणपत्रम्, एकम् उत्साहवर्धन-पारितोषिकम् अपि प्रदास्यते।

हिमाचल- राजकीय- संस्कृत- शिक्षक- परिषद् मण्डल- मण्डीपक्षतः सर्वविद्यालयेभ्यः संस्कृत-अनुरागिभ्यश्च संस्कृतसप्ताहस्य कार्यक्रमेषु सोत्साहं भागं ग्रहीतुं संस्कृत-भाषायाः प्रचारप्रसारे च सक्रिययोगदानं दातुम् आह्वानं कृतम् अस्ति।

# कांगड़ाजनपदस्य राजकीय- वरिष्ठ- माध्यमिक- विद्यालय खलेट इत्यत्र संस्कृत- सप्ताहस्य प्रथमदिवसः आचरितः



**हिमसंस्कृतवार्ताः- डॉ. शालिनी।**

कांगड़ाजनपदस्य राजकीय- वरिष्ठ- माध्यमिक-विद्यालय खलेट इत्यत्र उत्साहपूर्णवातावरणे संस्कृतसप्ताहस्य प्रथमदिवसः आचरितः। अस्मिन् अवसरे विद्यालयस्य प्रधानाचार्या रीति धीमानवर्या छात्रेभ्यः वेदानां विषयौचित्येन ज्ञानवर्धक-विषयानबोधयत्। संस्कृताध्यापिका डा.शालिनी प्राध्यापिका नीलमवर्या च छात्रैः संस्कृतश्लोकगानम् अकारयतां, तेषां माध्यमैः चित्रनिर्माणम् अपि कारितवत्यौ। अस्य कार्यक्रमस्य सफलतार्थं विद्यालयस्य समस्तशिक्षकवृन्दः सानन्दं छात्राणाम् उत्साहवर्धनम् अकरोत्।

# एकवीरा-मन्दबुद्धि-बालकानां बालगृहस्य काचुरवाही-छात्रैः निर्मितानां रक्षासूत्राणां प्रदर्शनी आयोजिता



**हिमसंस्कृतवार्ताः- रामटेकम्, नागपुरम्।**
कविकुलगुरु- कालिदास- संस्कृत- विश्वविद्यालयेन (रामटेक) सञ्चालितस्य 'बहिःसम्पर्क-कार्यक्रमविभागस्य' पक्षतः विविधाः सेवाभाविनः कार्यक्रमाः उपक्रमाश्च आयोज्यन्ते। अस्य विभागस्य प्रमुखम् उद्देश्यं समाजं प्राप्य तेभ्यः यथासम्भवं साहाय्य-प्रदानं वर्तते। अस्यैव उद्देश्यस्य अन्तर्गतं २१ अगस्त २०२६ दिनाङ्के एकवीरा-मन्दबुद्धि-बालकानां बालगृहस्य, काचुरवाही (उपमण्डलं रामटेकम्, मण्डलं नागपुरम्) इत्यस्य छात्राणां कलायाः सृजनात्मक- प्रतिभायाश्च प्रोत्साहनाय तैः निर्मितानां रक्षासूत्राणां (राखी) प्रदर्शनी परमपूज्य-गोलवलकर- गुरुजी- शैक्षणिकपरिसरे रामटेके आयोजिता। एषा प्रदर्शनी कविकुलगुरु-कालिदास- संस्कृत- विश्वविद्यालयस्य माननीयस्य प्रभारी-कुलसचिवस्य प्रो. प्रसादगोखलेमहोदयस्य मार्गदर्शने आयोजिता अभवत्। प्रदर्शिन्याः उद्घाटनं शिक्षणशास्त्र- सङ्कायस्य माननीयया अधिष्ठात्र्या प्रो. ललिताजोशी- महोदयया कृतम्। अस्मिन् अवसरे प्रो. हृषीकेशदलाई-महोदयः राजेश- चकीनारपुवार-महोदयश्च उपस्थितौ आस्ताम्। विश्वविद्यालयस्य सर्वैः कर्मचारीभिः विशेषरूपेण च छात्रैः एकवीरा-मन्दबुद्धि-बालकानां बालगृहस्य (काचुरवाही) छात्रैः निर्मितानां रक्षासूत्राणाम् उत्साहेन क्रयणं कृतम्। विगतवर्षस्य तुलनया अस्मिन् वर्षे प्रदर्शनीं प्रति द्विगुणितः उत्साहपूर्णः प्रतिसादः प्राप्तः। अस्मिन् अवसरे एकवीरा-मन्दबुद्धि-बालकानां बालगृहस्य विशेषशिक्षकाः निलेशबडवाईकः, सचिनरोकडे, पूनमवगीरे च इत्येते प्रदर्शनीं सफलां विधातुं विभागस्य सञ्चालकाय डॉ. अनिलकुमाराय विभागस्य कर्मचारिभ्यश्च कृतज्ञतां प्राकटयन्। तैः एतदपि प्रोक्तं यत् विश्वविद्यालयेन भविष्येऽपि एतादृशाः सेवाभाविनः सामाजिक-सरोकारैः सम्बद्धाः कार्यक्रमाः आयोजनीयाः।
अस्याः प्रदर्शिन्याः साफल्ये बृजेशसोमकुंवरस्य, पवनकळंबे-महोदयस्य, मनीषासहारे-वर्यायाश्च महत्त्वपूर्णः सहयोगः प्राप्तः।

# मोहरीदेवी-खण्डेलवाल-परिसरे संस्कृताध्ययन-केन्द्रस्य उद्घाटनं संस्कृतसप्ताहस्य शुभारम्भः

**हिमसंस्कृतवार्ताः-प्रवेशकुमारशुक्लः, महाराष्ट्र**

## शोभायात्रया नगरे संस्कृतभाषां प्रति जनजागरणस्य सन्देशः






अकोलानगरे मोहरीदेवी-खण्डेलवाल-परिसरे स्थिते गीतादेवी- खण्डेलवाल- औषधनिर्माण- महाविद्यालये केन्द्रीय- संस्कृत- विश्वविद्यालयेन सञ्चालितस्य संस्कृताध्ययनकेन्द्रस्य उद्घाटनं, संस्कृतसप्ताहस्य च शुभारम्भः हर्षोल्लासेन सम्पन्नः अभवत्। कार्यक्रमे प्रायः द्विशताधिकाः अतिथयः, शिक्षकाः, विद्यार्थिनः, संस्कृतप्रेमिणः उपस्थिताः आसन्। अकोलानगरे सिविल-लाइन-मार्गे स्थिते सीताबाई- कला-वाणिज्य- विज्ञान- इत्यस्मिन् महाविद्यालये द्वितीयं संस्कृताध्ययनकेन्द्रम् अपि सञ्चालितम् अस्ति। केन्द्रयोः प्रशिक्षकः हरिश्चन्द्रः वर्तते। कार्यक्रमस्य प्रारम्भे संस्कृतभाषायाः प्रचार- प्रसाराय विद्यार्थिभिः शोभायात्रा आयोजिता। शोभायात्रायां संस्कृतजयघोषैः, श्लोकपाठैः, संस्कृतस्य महत्त्वसम्बद्धैः सन्देशैः च जनजागरणं कृतम्। तदनन्तरम् अतिथीनां करकमलैः संस्कृताध्ययनकेन्द्रस्य उद्घाटनं, संस्कृतसप्ताहस्य च शुभारम्भः कृतः। भगवान् श्रीकृष्णस्य स्मरणेन, सरस्वती-वन्दनेन, स्वस्तिवाचनेन, ध्येयमन्त्रपाठेन, दीपप्रज्वालनेन च कार्यक्रमः प्रारब्धः। केन्द्राधिकारिण्या आर्यप्रभाकाले-महोदया स्वागतं प्रास्ताविकभाषणं च प्रस्तुतवती। सा संस्कृतं भारतीयज्ञानपरम्परायाः प्रमुखं माध्यमम् इति प्रतिपाद्य केन्द्रस्य उद्देश्यान् स्पष्टवती। केन्द्रस्य माध्यमेन विद्यार्थिषु संस्कृतभाषायाः प्रति रुचिवर्धनं, सम्भाषणात्मकसंस्कृतस्य व्यावहारिक- ज्ञानविकासः, संस्कृतस्य अध्ययन-अध्यापनयोः प्रभावी व्यवस्था कर्तुं प्रयत्नः भविष्यति। मुख्यवक्ता वसन्तखण्डेलवालमहोदयः संस्कृतभाषायाः सांस्कृतिकमहत्त्वं प्रतिपाद्य विद्यार्थिभ्यः संस्कृतस्य दैनिकजीवने प्रयोगं कर्तुम् आह्वानं कृतवान्। विशिष्टातिथिः डॉ. अरुणोपाख्यः नानासाहेब-कुलकर्णी- महोदयः संस्कृतस्य नियमिताध्ययनस्य आवश्यकता प्रतिपादितवान्। सुभाषभालेराव महोदयः संस्कृतं ज्ञानसंस्कारयोः वाहिका इति अवदत्। प्रमोदः टेकाडे-महोदयः संस्कृतस्य आधुनिकमहत्त्वं प्रतिपाद्य विद्यार्थिभ्यः संस्कृताध्ययनाय प्रेरणां दत्तवान्।
कार्यक्रमस्य अध्यक्षता डॉ. ताराताई हातवळणे-महोदया अकरोत्। सा अवदत् यत् "संस्कृतं भारतीयसंस्कृतेः आत्मस्वरूपम् अस्ति" विद्यार्थिषु संस्कृतस्य प्रति अनुरागस्य विकासेन भारतीय- ज्ञान-परम्परायाः संरक्षणं अधिकं सुदृढं भविष्यति इति सा प्रतिपादितवती। संस्कृताध्ययनकेन्द्रं विद्यार्थिनां सर्वाङ्गीणविकासे महत्त्वपूर्णां भूमिकां निर्वक्ष्यति इति सा विश्वासं प्रकटितवती। संस्कृतसप्ताहस्य अन्तर्गते सम्भाषणाभ्यासः, श्लोकपाठः, संस्कृतगीतानि, व्याख्यानानि, प्रश्नोत्तरी, विविधाः संस्कृताधारिताः प्रतियोगिताः च आयोजयिष्यन्ते।
कार्यक्रमस्य सञ्चालनं तुषारमहोदयेन, स्वस्तिवाचनं चैतन्येन, ध्येयमन्त्रपाठः भावनया, संस्कृतगीतप्रस्तुतिः कवितामहोदयया, अतिथिपरिचयः ज्योतिमहोदयया, आभारप्रदर्शनं हरिश्चन्द्रमिश्रेण च कृतम्। कल्याणमन्त्रपाठेन कार्यक्रमस्य समापनम् अभवत्। सम्पूर्णः कार्यक्रमः संस्कृतभाषायाः प्रचार-प्रसारस्य, जनजागरणस्य तथा भारतीयज्ञानपरम्परायाः संरक्षण-संवर्धनस्य प्रेरणादायकः अवसरः अभवत्।

# संस्कृतप्रतिभान्वेषणप्रतियोगितायां डी. पी. एस. वाराणसी इत्यस्य उत्कृष्टप्रदर्शनम्

हिमसंस्कृतवार्ताः-उत्तरप्रदेशसंस्कृतसंस्थानेन, लखनऊद्वारा आयोजितायां 'संस्कृतप्रतिभान्वेषण' नाम्न्यां जनपदस्तरीय- प्रतियोगितायां दिल्ली पब्लिक स्कूल, वाराणसी इत्यस्य विद्यार्थिनः उत्कृष्टं प्रदर्शनं कृत्वा चतुर्थस्थानं प्राप्य विद्यालयस्य गौरवं वर्धितवन्तः। एषा प्रतियोगिता गुरुकार्ष्णी-विद्याभवने, दुर्गाकुण्डे, वाराणस्यां आयोजिताऽभवत्। अस्यां प्रतियोगितायां वाराणसीजनपदस्य प्रायः विंशति-विद्यालयानां महाविद्यालयानां च अष्टाशीतिः (८०) विद्यार्थिनः उत्साहपूर्वकं भागं गृहीतवन्तः।

## प्रतियोगितायां मुख्यतः द्वे विधे आयोजिते आस्ताम्-

१. संस्कृतगीतप्रतियोगिता
२. संस्कृतसामान्यज्ञानप्रतियोगिता

उभयोरपि प्रतियोगितयोः दिल्ली पब्लिक स्कूल, वाराणसी इत्यस्य विद्यार्थिभिः स्वप्रतिभया, संस्कृतज्ञानस्य प्रावीण्येन, आत्मविश्वासेन च उत्कृष्टं प्रदर्शनं कृतम्। संस्कृतगीतप्रतियोगितायां नवमकक्षायाः इत्यस्य छात्रा इदीका राय सांत्वनापुरस्कारं प्राप्तवती। तथैव संस्कृत-सामान्यज्ञान- प्रतियोगितायां नवमकक्षायाः छात्रा काव्या जैन सांत्वनापुरस्कारेण सम्मानिता।
विद्यार्थिनां समग्रस्य उत्कृष्टप्रदर्शनस्य आधारेण दिल्ली पब्लिक स्कूल, वाराणसी इत्यस्मै जनपदस्तरे चतुर्थस्थानं प्राप्तम्। एषा उपलब्धिः विद्यालयपरिवारस्य कृते अत्यन्तं गौरवस्य विषयः अस्ति। इयं सफलता विद्यार्थिनां निरन्तरपरिश्रमस्य, संस्कृतभाषायां तेषां रुचेः, समर्पणस्य च फलम् अस्ति। संस्कृतविभागस्य शिक्षकाणां मार्गदर्शनं, सहयोगः एवं प्रेरणा अपि अस्याः सफलतायाः महत्त्वपूर्णं कारणम् अस्ति। अस्माकं विद्यार्थिनः संस्कृतभाषायाः भारतीयसंस्कृतेश्च प्रति स्वप्रतिबद्धतां प्रदर्शयित्वा अस्माकं विद्यालयस्य यशः सर्वत्र प्रसारितवन्तः।



# नैमिषारण्ये संस्कृतसप्ताहे गीतास्वाध्यायेन सह 'मम स्थाने संस्कृतम्' इत्युद्घोषः



**हिमसंस्कृतवार्ताः- सीतापुरम्, उत्तरप्रदेशः।**

नैमिषक्षेत्रस्थिते आत्मानन्दसंस्कृतशिक्षणसंस्थाने संस्कृतभारती, सीतापुरस्य तत्त्वावधानेन प्रचलितस्य संस्कृतसप्ताहस्य अन्तर्गतं श्रीमद्भगवद्गीतायाः पाठस्य स्वाध्यायस्य च विशेषसत्रम् आयोजितम्। अस्मिन् अवसरे बटुकानां मध्ये संस्कृतभाषायाः भारतीयज्ञानपरम्परायाश्च प्रति उत्साहः दृष्टः।

### बटुकैः कृतः गीताश्लोकानां सामूहिकपाठः-

संस्कृतभारत्याः कार्यकर्त्र्या अंशुगुप्तया मार्गदर्शिताः बटुकाः श्रीमद्भगवद्गीतायाः चयनितानां श्लोकानां शुद्धोच्चारणपूर्वकं सामूहिकपाठं कृतवन्तः। प्रत्येकस्य श्लोकस्य अनन्तरं तस्य सरलार्थः अपि व्याख्यातः, येन बटुकाः श्लोकान् कण्ठस्थीकर्तुं तेषां जीवनदर्शनं च अवगन्तुं समर्थाः अभवन्। स्वाध्यायसत्रे बटुकानां स्वयं श्लोकपठनस्य, अर्थावबोधनस्य परस्परं चर्चायाश्च अवसरः प्रदत्तः। अनेन तेषां अभिव्यक्तिक्षमता आत्मविश्वासश्च वर्धितः।

### 'मम स्थाने संस्कृतम्' इति ध्येयवाक्यस्य प्रतिपादनम्

कार्यक्रमे अंशुगुप्तया संस्कृतभारत्याः ध्येयवाक्यं 'मम स्थाने संस्कृतम्' इत्यस्य भावः विस्तरेण प्रतिपादितः। तया उक्तं यत् प्रत्येकः जनः स्वगृहे, विद्यालये, कार्यस्थले वा यत्र कुत्रापि भवेत्, तत्र दैनिकव्यवहारे संस्कृतभाषायाः प्रयोगं कुर्यात्। बटुकाः प्रतिदिनं संस्कृते कतिपयानि वाक्यानि वक्तुं अभ्यासं कुर्वन्तु, येन संस्कृतं तेषां जीवनस्य स्वाभाविकः भागः भवेत् इति सा प्रेरितवती।

### संस्कृतभारत्याः कार्याणां परिचयः-

अस्मिन् अवसरे संस्कृतभारत्याः कार्यपद्धतेः अपि परिचयः प्रदत्तः। वर्षे १९८१ तः संस्था संस्कृतभाषायाः पुनरुज्जीवनाय निरन्तरं कार्यं कुर्वती अस्ति। संस्कृतसम्भाषणशिबिरैः, बालसंस्कारकेन्द्रैः, संस्कृतसप्ताहकार्यक्रमैः तथा भाषाक्रीडाभिः बालकेषु युवकेषु च संस्कृतस्य प्रति रुचिः जागर्यते। क्रीडामाध्यमेन अधिगता भाषा बालानां मनसि सहजतया स्थायित्वं प्राप्नोति, संस्कृतभाषायाः प्रति भयभावश्च दूरीभवति।

### गीता जीवनस्य मार्गदर्शिका- आचार्यः सर्वेशशुक्लः

शिक्षणसंस्थायाः संस्थापकः आचार्यः सर्वेशशुक्लः बटुकेभ्यः आशीर्वचनं प्रददन् उक्तवान् यत् गीता केवलं धर्मग्रन्थः न, अपि तु सम्पूर्णजीवनस्य मार्गदर्शिका अस्ति। बाल्यावस्थायां गीतायाः स्वाध्यायः बालकानां चरित्रनिर्माणे संस्कारसंवर्धने च महत्त्वपूर्णं योगदानं ददाति। नैमिषारण्यस्य ऋषिमुनिभिः पवित्रितायां तपोभूमौ गीतापाठस्य आयोजनम् अत्यन्तं सार्थकम् इति तेन प्रतिपादितम्। बालकेषु बाल्यादेव संस्कृतस्य प्रति रुचिजागरणं तान् स्वकीयसांस्कृतिकमूलैः सम्बद्धं कर्तुं प्रभावी माध्यमम् अस्ति इति सः अवदत्।

### मंगलाचरणेन सत्रस्य समापनम्-

कार्यक्रमस्य अन्ते सर्वैः बटुकैः गीतायाः मंगलाचरणश्लोकस्य सामूहिकपाठः कृतः। तदनन्तरं सत्रस्य समापनम् अभवत्। संस्कृतसप्ताहस्य अन्तर्गतं आगामीदिवसेषु संस्कृतसम्भाषणं, श्लोकोच्चारणम्, भाषाक्रीडा तथा अन्याः ज्ञानवर्धकाः गतिविधयः अपि आयोजयिष्यन्ते, येन बटुकानां संस्कृतभाषायाः भारतीयसंस्कृतेश्च प्रति अनुरागः अधिकं वर्धेत।

# अयोध्यायां जनपदस्तरीयः संस्कृतप्रतिभाः सम्पन्ना





**हिमसंस्कृतवार्ताः- अयोध्या, उत्तरप्रदेशः।**

उत्तरप्रदेशसंस्कृतसंस्थानम्, लखनऊद्वारा आयोजितायाः 'संस्कृतप्रतिभाखोज– २०२६' प्रतियोगितायाः अन्तर्गतं अयोध्याजनपदे जनपदस्तरीयाः संस्कृतगीतप्रतियोगिता तथा संस्कृतसामान्यज्ञानप्रतियोगिता (बालवर्गः) उत्साहपूर्णे गरिमामये च वातावरणे सम्पन्ने। कार्यक्रमस्य शुभारम्भः मुख्यातिथिना अयोध्यायाः महापौरः महन्तगिरीशपतित्रिपाठीमहाराजेन दीपप्रज्वालनेन कृतः। अस्मिन् अवसरे मुख्यातिथिना उक्तं यत् उत्तरप्रदेशसंस्कृतसंस्थानं लखनऊ द्वारा आयोजितं 'संस्कृतप्रतिभाखोज' इति आयोजनम् अत्यन्तम् अद्भुतं प्रशंसनीयं च प्रयासः अस्ति। सम्पूर्णप्रदेशात् संस्कृतप्रतिभानां अन्वेषणं कृत्वा तासां पुरस्कारेण प्रोत्साहनेन च सम्माननं सराहनीयम् अनुकरणीयं च कार्यम् अस्ति। अनेन भाविपीढ्यां संस्कृतभाषायाः प्रति अनुरागः निश्चितरूपेण वर्धिष्यते।

### संस्कृतगीतप्रतियोगितायां आयुषः प्रथमस्थानम्-

संस्कृतगीतप्रतियोगितायाम् आयुषकुमारः प्रथमस्थानं, शनियादवः द्वितीयस्थानं तथा शिवानी तृतीयस्थानं प्राप्तवती। सौरभः, अनिकेतः तथा अंशिकागौडः सान्त्वनापुरस्काराय चयनिताः।

### संस्कृतसामान्यज्ञान- प्रतियोगितायां रघुनन्दनः प्रथमः

संस्कृतसामान्यज्ञानप्रतियोगितायां रघुनन्दनः प्रथमस्थानं, गोविन्दशुक्लः द्वितीयस्थानं तथा सिद्धान्तशुक्लः तृतीयस्थानं प्राप्तवन्तः। हर्षितः, ईशा, नवीनमिश्रः च सान्त्वनापुरस्काराय चयनिताः।

### निर्णायकमण्डले विद्वांसः उपस्थिताः-

प्रतियोगितायाः निर्णायकमण्डले डॉ. अखिलेश-कुमारः, सहायकप्राध्यापकः, साकेत पी. जी. महाविद्यालयः, अयोध्या; आचार्यः चन्दनकुमार आर्यः, सहायकाचार्यः, गुरुकुलमहाविद्यालयः, शाहजहाँपुर; डॉ. रामतेजपाण्डेयः, राष्ट्रपतिसम्मानितः पूर्वप्राचार्यश्च, योगीराज- संस्कृत- महाविद्यालयः, अयोध्या, कुसुमा, प्रवक्त्री, महाराजाइण्टरकॉलेजः, अयोध्या इत्येते सदस्याः आसन्। कार्यक्रमे जनपदसंयोजकः दीपुकुमारपाण्डेयः, मण्डलसंयोजकश्च, मनीषदेवः सहितं विभिन्नविद्यालयानां प्रधानाचार्याः, शिक्षकाः, अभिभावकाः तथा छात्रच्छात्राः उपस्थिताः आसन्। कार्यक्रमस्य सफलायोजनाय उपस्थितैः अतिथिभिः सर्वेभ्यः विजेतृभ्यः प्रतिभागिभ्यश्च शुभकामनाः प्रदत्ताः। संस्कृतभाषायाः अध्ययनं, संरक्षणं संवर्धनं च प्रति निरन्तरं प्रयत्नं कर्तुं छात्राः प्रेरिताः। प्रतियोगितायाः माध्यमेन अयोध्याजनपदे संस्कृत-प्रतिभानां प्रोत्साहनाय नूतनः उत्साहः सञ्चारितः।

# डी.पी.एस. बोकारो-प्रधानाचार्यः डॉ. गंगवारः 'बेस्ट इन्टरनेशनल प्रिन्सिपल अवार्ड २०२६' इत्यनेन सम्मानितः



**हिमसंस्कृतवार्ताः- सौरभः दे, बोकारो**

दिल्ली- पब्लिक- विद्यालयस्य, बोकारो-नगरस्य प्रधानाचार्यः डॉ. ए. एस. गंगवारः स्वस्य गौरवपूर्णसिद्धीनां मुकुटे पुनरपि एकं प्रतिष्ठितं सम्मानं योजितवान्। वैश्विकशैक्षिकमञ्चे तस्य दूरदर्शी नेतृत्वस्य, शैक्षिकोपक्रमाणां तथा शिक्षाजगति उत्कृष्टयोगदानस्य कृते साइन्स ओलम्पियाड फाउण्डेशन संस्थया तस्मै 'बेस्ट इन्टरनेशनल प्रिन्सिपल अवार्ड २०२६' इति प्रतिष्ठितः पुरस्कारः प्रदत्तः। डॉ. गंगवारस्य दूरदर्शिनः कुशलस्य च नेतृत्वस्य अधीनं डी.पी.एस. बोकारोविद्यालयं न केवलं शैक्षणिकक्षेत्रे, अपि तु सहशैक्षिकक्षेत्रेष्वपि निरन्तरं नूतनानि शिखराणि अधिरोहति। अयं प्रतिष्ठितः पुरस्कारः तस्य मार्गदर्शनस्य नेतृत्वस्य च सम्मानस्वरूपः अस्ति, यस्य फलस्वरूपं डी.पी.एस. बोकारो-विद्यालयस्य छात्राः SOF- ओलम्पियाड-परीक्षासु अन्तर्राष्ट्रीयस्तरे उत्कृष्टं प्रदर्शनं कृतवन्तः। गत पञ्चविंशतिवर्षेभ्यः डी. पी. एस. बोकारोविद्यालयं प्रतिष्ठितेषु SOF- ओलम्पियाड- परीक्षासु निरन्तरं सहभागितां करोति।

# श्रीआद्यशङ्कराचार्य- संस्कृतस्तोत्रपठन- स्पर्धया स्वामीविवेकानन्दभवनं संस्कृतमयम्

## प्रज्ञावन्तः नन्दकुमार जी. बेण्डाळे इत्यस्य प्रेरणया सङ्कल्पेन च साकारितस्य उपक्रमस्य विद्यार्थिभिः उत्स्फूर्तः प्रतिसादः





### श्रीकृष्णाष्टकस्य श्रीरुद्राष्टकस्य च सस्वरपठनेन संस्कृत-संस्काराणां जागरणम्; नवम-दशमकक्ष्ययोः विद्यार्थिनां उत्स्फूर्तः सहभागः

हिमसंस्कृतवार्ताः-जलग्राम, प्रतिनिधिः। के.सी.ई. संस्थायाः माननीयाध्यक्षस्य प्रज्ञावन्तः नन्दकुमार जी. बेण्डाळे इत्यस्य प्रेरणया, सङ्कल्पेन मार्गदर्शनेन च साकारितायाः 'श्रीआद्यशङ्कराचार्य-संस्कृतस्तोत्रपठनस्पर्धायाः' विद्यार्थिभिः उत्स्फूर्तः प्रतिसादः प्रदत्तः। संस्कृतभाषायाः, भारतीयसंस्कृतेः, समृद्धज्ञानपरम्परायाश्च विद्यार्थिभ्यः परिचयः भवेत्, शुद्धोच्चारणं, स्मरणशक्तिः, आत्मविश्वासः, संस्कृतभाषायां प्रेम च वर्धेत इति उद्देशेन के.सी.ई. सोसायटी-संस्थायाः मूलजी जेठा (स्वायत्त) महाविद्यालयस्य स्वामीविवेकानन्द-कनिष्ठमहाविद्यालये विश्वसंस्कृतदिवसस्य औचित्येन जलग्राम- महानगरस्तरीया 'श्रीआद्यशङ्कराचार्य-संस्कृतस्तोत्रपठनस्पर्धा- २०२६' उत्साहपूर्णवातावरणे सम्पन्ना। महाविद्यालयस्य सुवर्णमहोत्सवीवर्षस्य निमित्तेन आयोजितायाः अस्याः स्पर्धायाः एतत् तृतीयं वर्षम् आसीत्। संस्कृतस्य भारतीयसंस्कृतेश्च संरक्षण-संवर्धनाय आयोज्यमानानाम् एतादृशानाम् उपक्रमाणां कृते अध्यक्षस्य प्रज्ञावन्तः नन्दकुमार जी. बेण्डाळे इत्यस्य सातत्यपूर्णं प्रोत्साहनं मार्गदर्शनं च प्राप्तम्। अतः विद्यार्थिषु संस्कृतभाषायाः प्रति प्रेम, भारतीयसंस्काराणां प्रति आदरभावः च दृढतया विकसितः।**स्वामीविवेकानन्दभवनं संस्कृतमयम्-**
स्वामीविवेकानन्दभवने आयोजितायां अस्यां स्पर्धायां जलग्रामनगरस्य विभिन्नविद्यालयेभ्यः नवम-दशमकक्ष्ययोः विद्यार्थिभिः उत्स्फूर्ततया सहभागः कृतः। विद्यार्थिनां सामूहिकेन, लयबद्धेन भावपूर्णेन च स्तोत्रपठनेन सम्पूर्णं परिसरं संस्कृतमयम् अभवत्।
स्पर्धायां समग्रतः ३४२ विद्यार्थिनः सहभागं कृतवन्तः। नवमकक्ष्यागते नव दलानि, दशमकक्ष्यागते च षोडश दलानि सहभागं कृतवन्तः। तदतिरिक्तं २६ वादकाः तथा २९ दलव्यवस्थापकाः अपि उपस्थिताः आसन्। विविधविद्यालयानां दलैः मनोहरैः श्लोकपठनैः कार्यक्रमे विशेषः उत्साहः सञ्जातः।

**मान्यवराणां उपस्थितौ मङ्गलमयः शुभारम्भः**

स्पर्धायाः उद्घाटनं खानदेश- महाविद्यालय- शिक्षा-समिति, जलग्रामस्य सञ्चालकेन प्राचार्येण डॉ. अशोकराणे इत्यनेन कृतम्। संस्थायाः सांस्कृतिकसमन्वयकः शशिकान्तवडोदकरः प्रमुखोपस्थितः आसीत्। कार्यक्रमस्य अध्यक्षस्थानं महाविद्यालयस्य कार्यवाहकप्राचार्यः डॉ. केतननारखेडे इत्यनेन अलङ्कृतम्। अस्मिन् अवसरे संस्थया नियुक्ताः समन्वयकाः पूर्वोपप्राचार्यः प्रा. आर. बी. ठाकरे, प्रा. स्वाती बर्हाटे, कनिष्ठमहाविद्यालयस्य उपप्राचार्या प्रा. राजश्रीमहाजन, पर्यवेक्षिका प्रा. शिल्पासरोदे, शाखासमन्वयकौ प्रा. उमेशपाटील तथा प्रा. गुणवंतवंजारी, संस्कृताध्यापकः प्रा. अर्जुनशास्त्रीमेटे, कार्यक्रमस्य आयोजकौ प्रा. महेन्द्रराठोडः, शोभना कावळे च उपस्थिताः आसन्।
मान्यवरैः वैदिकविधिना यज्ञप्रज्वालनं कृतम्। गौरवपण्डितस्य मन्त्रपाठेन शङ्खध्वनिना च मङ्गलमयवातावरणे कार्यक्रमस्य शुभारम्भः अभवत्। प्रा. मयूरीहरिमकर-महोदयया सङ्गीतविभागस्य च कलाकारैः प्रस्तुतं मधुरं स्वागतगीतं वातावरणं प्रसन्नमकरोत्।
प्रा. महेन्द्रराठोडेन प्रस्तावनाभाषणे स्पर्धायाः सङ्कल्पना, उद्देश्यानि तथा संस्कृतसंवर्धने अस्य उपक्रमस्य महत्त्वं विशदीकृतम्। प्रमुखातिथिः डॉ. अशोकराणे इत्यनेन उक्तं यत्, "विद्यार्थिजीवने संस्कृतेः जागरणं कर्तुम् इच्छामः चेत् संस्कृतभाषायाः संरक्षणं संवर्धनं च अनिवार्यम् अस्ति। मानवीयमूल्यानां संरक्षणे संस्कृतभाषायाः महत्त्वपूर्णः योगदानम् अस्ति।"
महाविद्यालयस्य प्राचार्यः डॉ. केतननारखेडे इत्यनेन प्रतिपादितं यत्, "भारतीयसंस्कृतेः संरक्षणं तस्याः मूल्यपरम्परायाश्च रक्षणं सर्वेषां परमं कर्तव्यम् अस्ति।" उपप्राचार्या प्रा. राजश्रीमहाजन इत्यनया महाविद्यालयस्य यशःपरम्परायाः विषये विस्तृतं विवेचनं कृतम्।

**कृष्णभक्तेः आरभ्य रुद्रभक्तिपर्यन्तं मन्त्रपठनेन मोहिताः उपस्थिताः**

स्पर्धायाः आयोजनं कक्षानुसारं द्वयोः वर्गयोः कृतम्। नवमकक्ष्यायै 'श्रीकृष्णाष्टकम् स्तोत्रम्', दशमकक्ष्यायै च 'श्रीरुद्राष्टकम् स्तोत्रम्' निश्चितम् आसीत्। विद्यार्थिभिः शुद्धोच्चारणेन, समुचितस्वर- लय- गत्या, भावपूर्णेन प्रस्तुतिकरणेन आत्मविश्वासयुक्तया च शैलीया स्तोत्राणां प्रभावपूर्णं पठनं कृतम्। तेषां सामूहिकपठनेन उपस्थितानां संस्कृतभाषायाः माधुर्यस्य अद्भुतः अनुभवः अभवत्। परीक्षकैः शास्त्रसम्मतं शुद्धोच्चारणम्, स्मरणम्, स्वरः, लयः, गतिः, भावपूर्णं प्रस्तुतिकरणम्, आत्मविश्वासः तथा प्रतिसादः इत्येतेषां निकषाणां आधारेण विद्यार्थिनां मूल्याङ्कनं कृतम्।

**अनुभवीपरीक्षकैः उत्तरदायित्वस्य निर्वहनम्-**

स्पर्धायाः परीक्षकत्वेन प्रा. सौ. अमिता निकम, प्रा. मयूरी हरिमकर, प्रा. शुभांगी बडगुजर तथा प्रा. लक्ष्मण नागटिळक इत्येतेषां महत्त्वपूर्णं योगदानम् आसीत्। स्पर्धायाः विभिन्नकक्षाणां उत्तरदायित्वं प्रा. वर्षा पाटील, प्रा. छाया चौधरी इत्याभ्यां समर्थतया निर्वहितम्। कक्षीयसूत्रसञ्चालनस्य दायित्वं प्रा. छाया पाटील, प्रा. वीणा भोळे इत्याभ्यां निर्वहितम्। कार्यक्रमस्य सूत्रसञ्चालनं प्रा. रूपम निळे, प्रा. संध्या महाजन तथा प्रा. गणेश सूर्यवंशी इत्येतैः कृतम्।

**विजेतृदलानां पारितोषिकैः प्रमाणपत्रैः सम्मानचिह्नैश्च गौरवः**

पारितोषिकवितरणसमारोहे के.सी.ई. सोसायटी-संस्थायाः शैक्षणिकसञ्चालिका डॉ. मृणालिनी फडणवीस प्रमुखातिथिरूपेण उपस्थिताः आसन्। ताभिः विजेतृदलानां पारितोषिकैः, प्रमाणपत्रैः सम्मानचिह्नैश्च गौरवं कृतम्।

**नवमकक्ष्यावर्गः**

प्रथमस्थानम्– कै. श्रीमती ब. गो. शानबाग माध्यमिक विद्यालयम्।
द्वितीयस्थानम्– नानासाहेब आर. बी. पाटील विद्यालयम् तथा ए. टी. झांबरे विद्यालयम्, जलग्रामम्, संयुक्तदलम्।
तृतीयस्थानम्– विवेकानन्दप्रतिष्ठान-सञ्चालितम् इंग्लिश मीडियम विद्यालयम् तथा एस. एल. चौधरी विद्यालयम्, जलग्रामम्।
प्रथमप्रोत्साहनपुरस्कारः– विवेकानन्दप्रतिष्ठान प्राथमिक- माध्यमिक विद्यालयम्, जलग्रामम्।
द्वितीयप्रोत्साहनपुरस्कारः– ओरियन स्टेट बोर्ड विद्यालयम्, जलग्रामम्।

**दशमकक्ष्यावर्गः-**

प्रथमस्थानम्– विवेकानन्दप्रतिष्ठान-सञ्चालितं प्राथमिक- माध्यमिक विद्यालयम्, जलग्रामम्।
द्वितीयस्थानम्– कै. ॲड. अच्युतराव अत्रे इंग्लिश मीडियम स्कूल तथा ओरियन स्टेट बोर्ड इंग्लिश मीडियम स्कूल, जलग्रामम्, संयुक्तदलम्।
तृतीयस्थानम्– काशीनाथ पलोड पब्लिक स्कूल तथा कै. श्रीमती ब. गो. शानबाग विद्यालयम्, जलग्रामम्, संयुक्तदलम्।
प्रथमप्रोत्साहनपुरस्कारः– नन्दिनीबाई वामनराव कन्याविद्यालयम्, जलग्रामम्।
द्वितीयप्रोत्साहनपुरस्कारः– ओरियन सी.बी.एस.ई. विद्यालयम्, जलग्रामम्।
प्रथमस्थानप्राप्तायै संस्थायै रु. १,५०१/-, द्वितीयस्थानप्राप्तायै रु. १,००१/-, तृतीयस्थानप्राप्तायै रु. ७०१/- इति धनराशिः, प्रमाणपत्रं तथा विद्यालयाय सम्मानचिह्नं प्रदत्तम्।
उभययोः प्रोत्साहनपुरस्कारप्राप्तदलयोः प्रत्येकस्मै रु. ५०१/-, प्रमाणपत्रं तथा विद्यालयाय सम्मानचिह्नं प्रदत्तम्। उभयवर्गयोः सर्वाधिकगुणान् प्राप्तवते कै. श्रीमती ब. गो. शानबाग विद्यालयाय, जलग्रामम्, 'डॉ. अण्णासाहेब जी. डी. बेण्डाळे भ्रमणशीलः चषकः' प्रदत्तः। स्पर्धायां सहभागं कृतवद्भ्यः सर्वेभ्यः विद्यार्थिभ्यः सहभागप्रमाणपत्राणि प्रदाय तेषां उत्साहवर्धनं कृतम्।**संस्कृतसंवर्धनाय नूतनदिशा**
विद्यार्थिनां मनसि संस्कृतभाषायाः प्रति प्रेमभावं जनयित्वा भारतीयस्य आध्यात्मिकायाः सांस्कृतिकस्याः च परम्परायाः परिचयं प्रददन् अयं उपक्रमः अत्यन्तं प्रभावकारी अभवत्। स्तोत्रपठनेन विद्यार्थिनां शुद्धोच्चारणकौशलस्य, स्मरणशक्तेः, प्रस्तुतिकरणकौशलस्य आत्मविश्वासस्य च विकासः अभवत्। संस्कृतभाषा भारतीयसंस्कृतेः अविभाज्यः अङ्गः अस्ति। वाण्या भाषायाः संस्कृतेश्च उभयोः समृद्धिः भवति। अस्मिन् कार्ये संस्कृतभाषायाः महत्त्वपूर्णं स्थानम् अस्ति।

# बिहारराज्यस्य डीएवी पब्लिक स्कूल बरारी भागलपुर इत्यत्र वेदप्रचारसप्ताहस्य भव्यः शुभारम्भः




**हिमसंस्कृतवार्ताः- डॉ. विमलेश झा,**

बिहारराज्यस्य डीएवी पब्लिक स्कूल बरारी भागलपुर इत्यस्य प्राङ्गणे वेदप्रचारसप्ताहस्य भव्यः शुभारम्भः विशेषप्रार्थनासभया वैदिकयज्ञकार्यक्रमेण च अभवत्। अस्मिन् सप्ताहे विद्यार्थिषु वेदान् प्रति, संस्कृतभाषां प्रति, भारतीय संस्कृतिं प्रति वैदिक मूल्यानि प्रति च रुच्योत्पादनाय विविधाः प्रतियोगिताः आयोजिताः भविष्यन्ति। उद्घाटनसत्रस्य विशेषप्रार्थनासभायां विद्यार्थिभिः संस्कृतभाषायां स्वागतगीतं प्रस्तुतवन्तः। अस्मिन् अवसरे संस्कृतशिक्षकः डा. विमलेश झा अवदत्- “वेदाः अस्माकं ज्ञानस्य स्रोतांसि सन्ति। अस्माभिः वेदानां मूलसन्देशः छात्राणां मनसि उपस्थापनीयः, वैदिकमूल्यानि स्वजीवने पुनः प्रतिष्ठापनीयानि।” तदनन्तरं विद्यालयस्य प्राचार्यः, अष्टमकक्षायाः विद्यार्थिनः विशेषे यज्ञकार्यक्रमे सहभागितां कृतवन्तः। वैदिकमन्त्राणां उच्चारणेन विद्यालयस्य वातावरणम् आध्यात्मिकं पवित्रं च अभवत्। विद्यालयस्य प्राचार्यः सह क्षेत्रीयाधिकारी अनिलकुमारमहाशयः स्वसम्बोधने अवदत् यत् वेदेषु वर्णितं ज्ञानम् आधुनिकविज्ञानस्य सन्दर्भेण प्रतिपादनम् आवश्यकम् अस्ति। सः यज्ञस्य वैज्ञानिकप्रक्रियायाः विषये प्रतिपादयन् अवदत् यत् यज्ञस्य सामग्रीषु, मन्त्रेषु, निर्धारितविधौ च विविधाः वैज्ञानिकाः पर्यावरणसम्बद्धाश्च पक्षाः अन्तर्निहिताः सन्ति। सः छात्रान् वेदानाम् अध्ययनं कृत्वा तेषां वैज्ञानिकं मानवीयं च पक्षं ज्ञातुं प्रेरितवान्। सः छात्रान् छात्राश्च वेदप्रचारसप्ताहस्य सर्वासु प्रतियोगितासु उत्साहपूर्वकं भागं ग्रहीतुं प्रेरितवान्। एतदनन्तरं चित्रकलाप्रतियोगितायाः आयोजनम् अभवत्, यस्यां प्रायः द्विशतं विद्यार्थिनः उत्साहपूर्वकं भागं गृहीतवन्तः। प्रतियोगिता द्वयोः वर्गयोः विभक्ता आसीत्

**प्रथमसमूहः- तृतीयवर्गतः पञ्चमवर्गपर्यन्तम्।**
**द्वितीयसमूहः- षष्ठवर्गतः अष्टमवर्गपर्यन्तम्।**

छात्राः योगिराजश्रीकृष्णस्य, महर्षेः दयानन्दसरस्वत्याः, भारतस्य अन्येषां महापुरुषाणां भारतीयसंस्कृतेः सम्बन्धितविषयाणां च आकर्षकाणि चित्राणि निर्माय स्वकीयां सृजनात्मकप्रतिभां प्रदर्शितवन्तः। वेदप्रचारसप्ताहस्य अन्तर्गते श्लोकोच्चारण- प्रतियोगिता, वेदमन्त्रोच्चारणप्रतियोगिता, भाषणप्रतियोगिता, विविधभेषभूषा- प्रतियोगिता (फैन्सी ड्रेस), समूहभजनप्रतियोगिता, हवनप्रतियोगिता, रूपलेखनप्रतियोगिता, समूहसंस्कृतगीतप्रतियोगिता इत्यादीनां विविधप्रतियोगितानाम् आयोजनं भविष्यति। वेदप्रचारसप्ताहस्य एतत् आयोजनं विद्यार्थिनः भारतीयज्ञानपरम्परया सह, वैदिकसंस्कृत्या सह , संस्कृतभाषया सह च योजयितुम् एकं महत्त्वपूर्णं प्रेरणादायकं च सोपानम् अस्ति। कार्यक्रमस्य सफलसञ्चालने आशीषकुमारदासः, सुजीतकुमारमण्डलः, अभिषेककुमारशर्मा, मुक्ता वर्मा, वसुन्धरा कुमारी, प्रतिमा राय चौधरी, डेजी कुमारी, विनीता भारती, प्रगति मिश्रा इत्यादीनां विद्यालयस्य समस्तशिक्षक- शिक्षिकाणां शिक्षकेतर- कर्मचारिणां च योगदानं प्रशंसनीयम् आसीत्।




अहो! ऐतिहासिकोऽयं संस्कृतसप्ताहोद्घाटनकार्यक्रमः इतिहासे प्रथमवारं संस्कृतभारती-काशी, संस्कृतविद्याधर्मविज्ञानसंकायः,वैदिकविज्ञानकेन्द्रम्, संस्कृतविभाग(कला संकायः), विश्वनाथमन्दिरम् इत्येतेषां संयुक्ततत्वावधाने संस्कृत- सप्ताहोद्घाटनोत्सवः काशीहिन्दूविश्वविद्यालये समायोजितः । तत्रादौ संस्कृतसप्ताहस्य प्रचारार्थं वैदिकविज्ञानकेन्द्रतः मालवीयभवनपर्यन्तं शोभायात्रा प्रचालिता। जयतु जयतु संस्कृतभाषा प्रभृतजयघोषैः आविश्वविद्यालये "संस्कृतं सर्वत्र, संस्कृतं सर्वेषाम्" इति संदेशः प्रसारितः । समारोहे संस्कृतगीतप्रस्तुतिः सुश्री सुदीपापाल,निशुविश्वकर्मा च दत्तवती। उद्घाटनकार्यक्रमे अध्यक्षत्वेन काशीहिन्दूविश्वविद्यालयस्य कुलपतीनां प्रो० अजितकुमारचतुर्वेदीवर्याणां महदुपस्थिति आसीत्, स्वाध्यक्षीयभाषणे कुलपतिना संस्कृतभाषायां संस्कृतसप्ताहस्य शुभकामना अदायि। कुलपतिवर्येण संस्कृतभाषाप्रचारार्थं संस्कृतभारत्यैः श्लाघितम् एवञ्च सर्वे संस्कृतभाषिणः भवेयुः इत्यपि प्रेरितम्। समारोहे मुख्यवक्तृत्वेन संस्कृतभारती अखिलभारतीयपत्राचारप्रमुखः श्रीमान् डॉसंजीवरायवर्यः संस्कृतस्य जीवनविकासे किं महत्वमिति प्रतिपादितवान् । इतोऽप्युक्तं यत् अखण्डभारतनिर्माणाय संस्कृतभाषा जनानां मुखे आगच्छेदिति। सहैव संस्कृतविद्याधर्मविज्ञान- संकायप्रमुखानां प्रो०राजारामशुक्लवर्याणामपि आशीर्वचांसि लब्धानि। कार्यक्रमस्य संचालकत्वेन संस्कृतभारती काशीप्रान्तस्य अध्यक्षः, व्याकरणविभागीयाचार्यः प्रो०रामनारायणद्विवेदीवर्य आसन् । स्वागतभाषणं वैदिकविज्ञानकेन्द्रस्य समन्वयकः प्रो०विनयकुमारपाण्डेयमहोदयेन कृतम्। उद्घाटनोत्सवस्यास्य संयोजकत्वेन कलासंकायस्थ संस्कृतविभागाध्यक्षः प्रो०सदाशिवकुमारद्विवेदीवर्येण धन्यवादः ज्ञापितः । विश्वनाथमन्दिरपक्षतः मन्दिरप्रबन्धकः प्रो०माधवजनार्दनरटाटेमहाभागः समुपस्थित आसन् । संस्कृतभारती काशीपक्षतः प्रान्ताधिकारिणः अशोकचौधरी प्रान्तशिक्षणप्रमुखः, अमरचन्द्रठाकुर प्रान्तपत्राचारप्रमुखः, सरोजपाण्डेय प्रान्तप्रचारप्रमुखआसन्। काशीमहानगरकार्यकर्तारः - प्रो०रविशंकरपाण्डेय महानगराध्यक्षः , श्रीनिवासदेव महानगरमन्त्री,विमलकुमारपाण्डेय महानगरसहमन्त्री,शिवममौर्यमहानगरसहशिक्षणप्रमुखः, अन्येऽपि कार्यकर्तारः सम्मिलिताः।न

# डॉ. बी. जी. आर. पौडीपरिसरे संस्कृत-सप्ताहस्य शुभारम्भः



***संस्कृतभाषा भारतीयज्ञानपरम्परायाः महत्त्वपूर्णा संवाहिका- "प्रो.पी.वी. बी.सुब्रह्मण्यम् निदेशकः के.सं.सं देवप्रयागः"***

पौडी, उत्तराखण्ड। डॉ. बी. जी. आर. पौड़ीपरिसरे संस्कृतविभागेन सप्तदिवसीयस्य संस्कृतसप्ताहस्य शुभारम्भः कृतः। अस्मिन् संस्कृतसप्ताहे सप्तदिनपर्यन्तं विविधविषयेषु विशेषज्ञाणां व्याख्यानानि आयोज्यन्ते, येषां मुख्योद्देश्यः संस्कृतभाषायाः, साहित्यस्य तथा भारतीयज्ञानपरम्परायाः समकालीनप्रासङ्गिकतायाः प्रकाशनम् अस्ति। संस्कृतसप्ताहस्य प्रथमदिने “समकालीनवैश्विकपरिप्रेक्ष्ये संस्कृतस्य प्रासङ्गिकता” विषयेस्मिन् मुख्यवक्ता प्रो. पी. वी. बी. सुब्रमण्यम्, निदेशकः, केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरस्य देवप्रयागस्थस्य, व्याख्यानम् अददात्। स्वव्याख्याने तेन समकालीनवैश्विकपरिदृश्ये संस्कृतस्य भूमिका तथा प्रासङ्गिकता विस्तरेण प्रतिपादिता। तेन संस्कृतभाषा भारतीयज्ञानपरम्परायाः महत्त्वपूर्णा संवाहिका भाषा इति प्रतिपाद्य तस्याः अध्ययनस्य व्यापकसम्भावनाः विवेचिताः। संस्कृतं केवलं भाषासाहित्ययोः सीमितं न स्थापयित्वा दर्शनसंस्कृतिज्ञानविज्ञानादिभिः विविधैः अन्तर्विषयकक्षेत्रैः सह सम्बद्धं कर्तव्यमिति तेन विशेषतः प्रतिपादितम्। कार्यक्रमे विशिष्टातिथिरूपेण प्रो. अनूपडोबरियालः उपस्थितः आसीत्। तदतिरिक्तं प्रो. यू. सी. गैरोलः, निदेशकः डॉ. बी. जी. आर. परिसरस्य; प्रो. कुसुमडोबरियालः, प्रो. अनीतारुदोला तथा प्रो. एस. सी. गैरोलः अपि गरिमामय्याः उपस्थितेः शोभां ववृधुः। कार्यक्रमस्य सञ्चालनं डा. दिनेशचन्द्रपाण्डेयः, संस्कृतविभागाध्यक्षः, अकरोत्। तेन संस्कृतसप्ताहस्य आयोजनस्य उद्देश्यः तथा सप्तदिवसीयव्याख्यानश्रृङ्खलायाः विस्तृतविवरणं प्रदत्तं, अतिथीनां प्रतिभागिनां च स्वागतं कृतम्। कार्यक्रमस्य अन्ते डा. बालकृष्णबडानी, संस्कृतविभागस्य सहायकाचार्यः, धन्यवादज्ञापनम् अकरोत्। तेन मुख्यातिथेः, विशिष्टातिथेः, परिसरनिदेशकस्य, उपस्थितानां प्राध्यापकाणां, विद्यार्थिनां तथा कार्यक्रमे सहयोगं कृतवतां सर्वेषां प्रति हार्दिकः कृतज्ञताभावः व्यक्तीकृतः।

अस्मिन् कार्यक्रमे परिसरस्य शिक्षकाः विद्यार्थिनश्च उपस्थिताः आसन्। संस्कृतसप्ताहस्य आगामिषु षट्सु दिवसेषु अपि विविधविशेषज्ञैः संस्कृतभाषा-साहित्य-भारतीयज्ञानपरम्परासम्बद्धविषयेषु व्याख्यानानि प्रस्तूयन्ते।

# महर्षिमहेशयोगीवैदिकविश्वविद्यालयस्य संस्कृतदिवसोपलक्ष्ये एक दिवसीया संगोष्ठी सुसम्पन्ना



**महर्षिमहेशयोगीवैदिकविश्वविद्यालयः, मध्यप्रदेशः एवं संस्कृतसंस्कृतिविकाससंस्थानम्, मध्यप्रदेशप्रान्तः** इत्यनयोः संयुक्ततत्त्वावधानेन संस्कृतदिवसोपलक्ष्ये संस्कृतमासमहोत्सवसन्दर्भे दिनाङ्के २५ अगस्त २०२६ दिनाङ्के मङ्गलवासरे सायं ७:३० वादने "श्रावणी-उपाकर्म वेदारम्भश्च : भारतीयसंस्कृतौ शिक्षा-संस्कारयोः सङ्गमः" इति विषयमधिकृत्य एकदिवसीया सङ्गोष्ठी गूगलमीट माध्यमेन सुसम्पन्ना। यत्र परमपूज्यकुलगुरुः आचार्यराधागोविन्दत्रिपाठीमहोदयः राष्ट्रियाध्यक्षः, (सं.सं.वि.सं) संरक्षकश्चासीत्। प्रो.(डॉ)नरेशकुमार त्रिपाठी (कुलगुरुः, महर्षिमहेशयोगीवैदिक विश्वविद्यालयः,मध्यप्रदेशः) सभापति आसीत्। प्रो.(डॉ) सत्यनारायणाचार्यमहोदयः(कुलगुरुः, ओडियाविश्वविद्यालयः, ओडिशा) मुख्यातिथिरूपेण च आसीत्। सङ्गोष्ठ्याः मुख्योद्देश्यं भारतीयपरम्परायां श्रावणी-उपाकर्मणः वेदारम्भस्य च महत्त्वं प्रतिपादयितुं, शिक्षा-संस्कारयोः परस्परसम्बन्धं प्रकाशयितुं तथा वर्तमानसमये वैदिकशिक्षायाः सांस्कृतिकमूल्यानां च प्रासङ्गिकतां जनसामान्येषु विद्यार्थिषु च प्रसारयितुम् आसीत्।

कार्यक्रमस्य शुभारम्भः पं. शिवम् झा शास्त्रीद्वितीयवर्ष-छात्रेण वैदिकमङ्गलाचरणेन अभवत्। ततः श्रीमत्या ज्योतिभगिन्या वेदवाणीं देववाणीम् इति गीतं प्रस्तुतम्। अनन्तरं डॉ. तुलसीदास-परौहा (उपाध्यक्षः,मध्यप्रदेशप्रान्तः,सं.सं.वि.सं) स्वागतभाषणं प्रदत्तम्।तदनन्तरं डॉ. आलोक चन्द्र परिडा वेदविभागाध्यक्षमहोदयेन प्रास्ताविकभाषणं प्रस्तुतम्। तेन श्रावणी-उपाकर्मणः, वेदारम्भस्य च भारतीयशिक्षापरम्परायां विशिष्टं स्थानं प्रतिपादयन् शिक्षा केवलं ज्ञानार्जनस्य प्रक्रिया न, अपितु संस्कारयुक्तजीवनस्य निर्माणप्रक्रिया अपि अस्ति—इति भावः तेन विशेषतया प्रकाशतः।

सङ्गोष्ठ्याः मुख्यातिथिवक्तृत्वेन प्रो. (डॉ.) सत्यनारायणाचार्यः, कुलपतिः,ओडियाविश्वविद्यालयः महोदयः उक्तवान् - शिक्षा मनुष्यस्य ज्ञानं, विवेकं, सदाचारं च विकसितं करोति। भारतीयपरम्परायां शिक्षायाः लक्ष्यं चरित्रनिर्माणं, आत्मानुशासनं, नैतिकमूल्यानां विकासश्च अस्ति। संस्कृतस्य वेदस्य प्रचारप्रसारः अस्माकं दायित्वमिति सम्बोधयन् वैदिकपरम्परायाः महत्त्वं तथा वेदारम्भस्य शैक्षिकमूल्यं विस्तरेण निरूपितवान्।

तदनन्तरं सङ्गोष्ठ्याः मुख्यवक्तृरूपेण डॉ. गोपालकृष्णशुक्लः, (सहा.प्राध्यापकः,वेद-संस्कृत-विभागः, विक्रमविश्वविद्यालयः, उज्जयिन)महोदयेन विषयस्य शास्त्रीयपक्षः विशदीकृतः। तेन श्रावणी-उपाकर्म, वेदारम्भ तथा भारतीयसंस्कृतौ शिक्षायाः संस्काराणां च अन्तःसम्बन्धः वैदिकदृष्ट्या विवेचितः।आधुनिकशिक्षाव्यवस्थायामपि भारतीयसंस्कारपरम्परायाः मूल्यं कथं संरक्षितुं शक्यते इति विषयः अपि तेन प्रकाशं नीतः।

सङ्गोष्ठ्याः अध्यक्षीयवचनं प्रो. निलिम्प त्रिपाठी, (प्रान्ताध्यक्षः, संस्कृतसंस्कृतिविकाससंस्थानम्, मध्यप्रदेशप्रान्तः) महोदयेन प्रदत्तम्। तेन भारतीयसंस्कृतौ संस्काराणां महत्त्वं प्रतिपाद्य संस्कृतभाषायाः, वैदिकपरम्परायाः तथा सांस्कृतिकमूल्यानां संरक्षणाय सर्वेषां सम्मिलितप्रयासस्य आवश्यकता निर्दिष्टा।

तदनन्तरं डॉ. वीणा मिश्रा महोदयया धन्यवादज्ञापनं कृतम्। अन्ते पं. बृजेशकुमारमिश्रः महोदयेन शान्तिपाठः कृतः, येन सङ्गोष्ठ्याः विधिवत् समापनम् अभवत्। सम्पूर्णकार्यक्रमस्य सफलं सञ्चालनं डॉ. अरविन्दनायकः महोदयेन सुचारुरूपेण कृतम्। सङ्गोष्ठ्याः समन्वयकः डॉ. आलोक चन्द्रपरिडामहोदयः आसीत्। कार्यक्रमस्य संयोजिका डॉ. एल्. सविता-आर्या आसीत्। सहसंयोजकरूपेण डॉ. शङ्करवेरा, डॉ. नवीनकुमारचौबे, डॉ. चन्द्रशेखरमिश्रः, डॉ. नित्येश्वरचतुर्वेदी तथा डॉ. राजन्कुमारचतुर्वेदी इत्येतेषां महत्त्वपूर्णं योगदानम् आसीत्।

अनेन प्रकारेण "श्रावणी-उपाकर्म वेदारम्भश्च : भारतीयसंस्कृतौ शिक्षा-संस्कारयोः सङ्गमः" इति विषयमधिकृत्य आयोजितेयं एकदिवसीया सङ्गोष्ठी भारतीयशिक्षापरम्परायाः, वैदिकसंस्काराणां च महत्त्वं प्रकाशयन्ती अत्यन्तं सार्थका, ज्ञानवर्धिनी च अभवत्। सङ्गोष्ठ्या भारतीयसंस्कृतेः संरक्षणे संवर्धने च संस्कृतस्य वैदिकपरम्परायाश्च महत्त्वपूर्णां भूमिकां पुनः रेखाङ्किता इति शम्।

# कामेश्वरसिंह-दरभङ्गा-संस्कृतविश्वविद्यालये समुद्घाटितः संस्कृतसप्ताहसमारोहः

## *योग्यशास्त्राभिज्ञानामेव भवेत् विश्वविद्यालयपदेषु नियुक्तिः — पूर्वकुलपतिः प्रो. शशिनाथ झा*



### जनमानससम्पर्काय संस्कृतेऽपि प्रसारणीयाः मनोरञ्जककार्यक्रमाः — सहायकनिदेशकः अमितकुमारः

**दरभङ्गा। डॉ. राघव नाथ झा, हिमसंस्कृतवार्ता।**
कामेश्वरसिंह-दरभङ्गा-संस्कृतविश्वविद्यालयस्य ऐतिहासिके दरबार-मण्डपे मङ्गलवासरे अत्यन्तहर्षोल्लासमय-वातावरणे संस्कृतसप्ताह-समारोहस्य विधिवत् समुद्घाटनं सम्पन्नम्। अयमुत्सवः आगामि-३१-दिनाङ्कं यावत् सञ्चालिष्यते, यस्मिन् संस्कृतसंवर्धनाय विविधाः शोधसङ्गोष्ठ्यः, शास्त्रचर्चाः, वक्तृत्व-श्लोकपाठ-प्रतियोगिताश्च समायोजिताः सन्ति। उद्घाटनसत्रस्याध्यक्षपदम् अलङ्कुर्वाणाः कुलपति-प्रो. लक्ष्मीनारायणपाण्डेयमहोदयाः उद्बोधने प्रोक्तवन्तः यत्— "वर्तमानकाले बृहत्सु लोकवेदिकासु विनाऽवबोधं मनुस्मृतिग्रन्थस्य निराकरणम् अनुचितनिन्दा च क्रियते, यत्तु अतीव चिन्त्यं दुःखदं च वर्तते। ईदृशी प्रवृत्तिः युवापीढीं दिग्भ्रमितां करोति, साक्षाच्च भारतीयसंस्कृतेर्मर्मणि कुठाराघातं प्रहरति। वस्तुतः भारतीयसंस्कृतेः सनातनमूल्यानां च यथार्थज्ञानाय गीर्वाणवाण्याः परिशीलनं नितान्तम् अनिवार्यम्। संस्कृतप्रतिपादितैः उदात्तसंस्कारैरेव समाजे अपराधानां कुप्रवृत्तीनां च समूलोन्मूलनम् अभ्युत्थानं च सम्भवम्।" शास्त्रपारङ्गतानां विदुषामेव भवेत् वरणम् सारस्वत-अतिथिरूपेण समुपस्थिताः पूर्वकुलपतयः डॉ. शशिनाथझामहोदयाः स्वविचारं प्रकटयन्तः अवदन् यत् संस्कृतस्य सर्वाङ्गीणविकासाय, विश्वविद्यालयस्य च गरिमारक्षणाय केवलं शास्त्रनिष्ठानां, योग्यानां, पारम्परिकविदुषामेव नियुक्तिः विधीयेत। संस्कृतं न केवलं कर्मकाण्डस्य, अपि तु सार्वजनीनजीवनस्य वाक् विशिष्टातितयः ल.ना.मिथिलाविश्वविद्यालयस्य आङ्ग्लविभागस्य पूर्वाध्यक्षाः प्रो. अशोककुमारबच्चनमहोदयाः प्रतिपादितवन्तः यत्— "संस्कृतं मन्दिर-मठ-पूजापद्धतिषु एव सीमितानस्ति, इयं तु सर्वासामपि भाषाणां मातृस्वरूपा, जीवनविद्यायाश्च मूलस्रोतः। नीतिश्लोकानां गीतादर्शनस्य च सञ्चारेणैव समाजस्य चारित्रिकं परिमार्जनं शक्यते।"

**लोकव्यवहारानुकूलं भवेत् संस्कृतप्रसारणम्**

आकाशवाणी-दरभङ्गायाः सहायकनिदेशकाः अमितकुमारमहोदयाः प्रतिपादितवन्तः यत् सामान्यजनसम्पर्काय संस्कृतेऽपि रोचक-मनोरञ्जककार्यक्रमाणां निर्माणं प्रसारणञ्च अपरिहार्यम्। कुलपतिमहोदयेन अस्य विचारस्य अभिनन्दनं कुर्वता विश्वविद्यालयातस्तदर्थं पूर्णसहयोगस्य आश्वासनं प्रदत्तम्। तत्पूर्वं मञ्चासीनैः विशिष्टातिथिभिः साकं कुलपति-प्रो. लक्ष्मीनारायणपाण्डेयः, स्नातकोत्तरप्रभारी प्रो. दिलीपकुमारझा, कुलसचिवः डॉ. दिनेशझा, डीन-प्रो. पुरेन्द्रवारिकप्रभृतिभिः संयुक्ततया मङ्गलदीपप्रज्ज्वालनेन समारोहस्य शुभारम्भो व्यधायि। विश्वविद्यालयान्तर्गत-शिक्षाशास्त्रविभागस्य, म.अ. रमेश्वरलता-संस्कृतमहाविद्यालयस्य, संस्कृतभारत्याश्च संयुक्ततत्त्वावधाने समायोजितेऽस्मिन् कार्यक्रमे छात्राभिः वैदिकमङ्गलाचरणं कुलगीतं च प्रस्तुतम्। समारोहस्य सूत्रसञ्चालनं डॉ. रामसेवकझामहोदयेन, धन्यवादारोहणं च राष्ट्रीयसेवाप्रकल्पस्य (NSS) कार्यपदाधिकारिणा डॉ. सुधीरकुमारेण विहितम्। कार्यक्रमे विश्वविद्यालस्य समे विद्वांसः, प्राध्यापकाः, अधिकारिणः, शोधच्छात्राश्च सश्रद्धम् उपस्थिताः आसन्।

# उत्तराखण्ड-भुवनेश्वरीसंस्कृतविद्यालये संस्कृतसप्ताहस्य भव्यः शुभारम्भः



पौडी जनपदस्य कोटविकाखण्डान्तर्गते ब्रिगेडियर विद्याधर जुयाल संस्कृतविद्यालये, संस्कृतभाषायाः संरक्षणं, संवर्धनं, प्रचारश्च कर्तुं तथा विद्यार्थिषु संस्कृतभाषायाः प्रति प्रेम, अनुरागः, रुचिः, गौरवभावना च जागरयितुं संस्कृतसप्ताहस्य भव्यः उत्साहपूर्णश्च शुभारम्भः अभवत्।

संस्कृतसप्ताहस्य प्रथमदिने विद्यालयपरिसरात् भव्यशोभायात्रा आयोजिताऽभवत्। छात्राः संस्कृतवाक्यैः, सुभाषितैः, श्लोकैः तथा संस्कृतघोषैः वातावरणं संस्कृतमयं कृतवन्तः। शोभायात्रायां विद्यार्थिनां उत्साहः, अनुशासनं, संस्कृतभाषायाः प्रति अनुरागश्च विशेषरूपेण दृष्टः। सम्पूर्णे विद्यालयपरिसरे "संस्कृत भाषायाः जयघोषेण गुंजायमानं अभवत।

कार्यक्रमे छात्रावासाधीक्षकः नवीनजुयालः तथा प्रधानाचार्या अनसूयाप्रसादः विद्यार्थिभ्यः सम्बोधनं कृतवन्तौ। तौ अवदताम् यत् संस्कृतं केवलं प्राचीना भाषा नास्ति, अपितु भारतस्य ज्ञान-विज्ञान-दर्शन-साहित्य-संस्कृतेः संस्काराणां च सशक्तं माध्यमम् अस्ति। संस्कृतस्य अध्ययनं तथा व्यवहारः विद्यार्थिषु अनुशासनं, विनयम्, आत्मविश्वासं, संस्कारान् तथा स्वकीयसंस्कृतेः प्रति गौरवभावनां च जनयति। अतः संस्कृतं केवलं पाठ्यक्रमस्य विषयत्वेन न, अपितु दैनन्दिनजीवनस्य व्यवहारभाषारूपेण अपि स्वीकरणीयम् इति ताभ्यां प्रेरिताः।

डा.नवीनममगाईं संस्कृतगीतेन संस्कृतदिवसस्य संस्कृतसप्ताहस्य च महत्त्वं प्रतिपादितवान्। सः विद्यार्थिभ्यः अवदत्— "अस्माकं परमं सौभाग्यम् अस्ति यत् वयं संस्कृतभाषायाः सेवकाः, उपासकाः च स्मः। अतः अस्याः देववाण्याः संरक्षणे, संवर्धने, प्रचार-प्रसारे च सर्वैः समर्पितभावेन प्रयत्नः करणीयः।" तस्य संस्कृतगीतस्य प्रस्तुतेः विद्यार्थिनः विशेषरूपेण उत्साहिताः अभवन्।

डा.अनूपकुकरेती संस्कृतसप्ताहस्य अन्तर्गतं भविष्यतां कार्यक्रमाणां विषये प्रकाशं पातयन् अवदत् यत् सप्ताहस्य विभिन्नेषु दिवसेषु विद्यार्थिभ्यः संस्कृतसम्भाषणम्, श्लोकपाठः, संस्कृतगीतगायनम्, संस्कृतभाषणम्, निबन्धलेखनम्, प्रश्नोत्तरी, विविधाः प्रतियोगिताः, भारतीयसंस्कृतिम् आधृत्य नाट्यप्रस्तुतयः तथा अन्ये मनोहराः सांस्कृतिककार्यक्रमाः आयोजयिष्यन्ते। एतेषां कार्यक्रमाणां माध्यमेन विद्यार्थिनां भाषाकौशलं, सृजनशीलता, अभिव्यक्तिक्षमता तथा सांस्कृतिकचेतना च विकसिताः भविष्यन्ति।

विद्यालयपरिवारस्य अनुसारं सम्पूर्णे संस्कृतसप्ताहे विविधाः शैक्षिकाः, सांस्कृतिकाः, रचनात्मकाश्च गतिविधयः आयोजयिष्यन्ते। एतेषु कार्यक्रमेषु विद्यार्थिनः स्वप्रतिभां प्रदर्शयितुं, संस्कृतेन स्वविचारान् व्यक्तुं तथा भारतीयसंस्कृतेः गौरवपूर्णपरम्परां ज्ञातुं अवसरं प्राप्स्यन्ति। संस्कृतसप्ताहस्य शुभारम्भेन विद्यालयस्य वातावरणं संस्कृतमयम् अभवत्। विद्यार्थिनां शिक्षकाणां च उत्साहः, अनुशासनं, समर्पणभावना च कार्यक्रमस्य आकर्षणं वर्धितवन्तः। शोभायात्रायाः सांस्कृतिकप्रस्तुतीनां च माध्यमेन संस्कृतभाषायाः प्रति विद्यार्थिषु नूतनः उत्साहः दृष्टिगोचरः अभवत्। कार्यक्रमे आशीषडबरालः, कमलदीपपोखरियालः, अङ्कितमैठाणी, ईशानडोभालः, नीरजपटवालः, मयङ्कसुन्दरियालः, रामेश्वरः, वैष्णवी इत्यादयः शिक्षकाः, कर्मचारीणः, विद्यार्थिनश्च उपस्थिताः आसन्।

# देहलीपुराधिपायाः

## कालिकायाः वृत्तिप्राप्तिस्तोत्रम्

क्रमशः...

सर्वसाक्षिणी स्वयं प्रकाशिका प्रगीयते,
वेद-वेदनीय-तत्त्वमत्र सा प्रपूज्यते ।
प्रीतये तवात्र कालिके ! न किं विधीयते ?
दासकाय जीविका वदेः कदा प्रदास्यते ।।(९१)
वेदवन्दितासि विश्वकीर्त्तितासि कालिका,
वृत्तिवृष्टि-वारिणाभिषेचयेः सुखं सदा ।
कालिकापदेऽस्ति सर्वदा ममात्मनिष्ठता,
नैकवासना-प्रपञ्चकं जहामि सर्वथा ।।(९२)
नौमि पादयुग्ममम्ब ! देहि योग्यजीविकाम्,
देहलीपुराधिपे ! कुरुष्व दृष्टिपातनम् ।
वृत्तिवित्तभूषितो भवानि येन सत्वरम्,
वीक्ष्य मे दशां चमत्कृतिं नवां विधेहि वै ।।(९३)
वृत्तिशून्यता लयं प्रयातु पाहि चण्डिके !
त्राहि कालिके ! सुतं सुखेन मां नियोजयेः ।
मन्दता प्रयातु वृत्तिहीनतोद्भवा क्षयम्,
स्वानुयायिने प्रयच्छ भव्यवृत्तिगौरवम् ।।(९४)
धीरताति दर्शिता मयैव वृत्तिहेतुना,
हारितं समग्रयौवनं तदर्थमेव हा !
नैजदीनतां कदा हरामि चार्थिकीं भृशम्,
हन्त हन्त कालिके ! नियुक्तिरेव दीयताम् ।।(९५)
उच्चयोग्यतायुतानि पत्रकाणि सन्ति मे,
दुर्गता स्थितिस्तथापि मे किमर्थमस्ति वा ।
तन्नियुक्तिमाप्तुमत्र रोधनं किमस्ति मे ?
वृत्तिजीविनं स्वबालकं प्रपाहि कालिके ! ।।(९६)
राजनीतिका जना नियुक्तिमाप्नुवन्ति ते,
धावनम् ह्यितस्ततो जने जने करोम्यहम्।
विह्वलीकृतोऽस्मि केन यामि कुत्र कालिके !
प्रदेहि जीविकां विपत्क्षणे पतामि देवि ! हे ! ।।(९७)
शिक्षणस्य लक्ष्यमस्ति जीवनोन्नतिस्सदा,
किन्तु शिक्षिताः स्वयं भवन्ति वृत्तिदुर्गताः ।
शिक्षिताश्च दुष्करे महार्घतान्विते युगे,
पश्य कालिके ! कथं भजन्ति दीनतां समे ।।(९८)
सर्वरूपिके ! नमामि पाहि देवि ! कालिके !
सूर्यकान्तितेजसा सुतार्त्तिहारिके ! शिवे ! ।
दुर्विपाक-पातकं विनाशय प्रचण्डिके !,
भक्तकामदे ! सुताय जीविकां प्रदेहि मे ।।(९९)
चण्डिके ! कपालिके ! त्वमम्ब ! भद्रकालिके !,
देहि योग्यजीविकां पदाम्बुजं भजामि ते ।
त्वत्पदाश्रयं गतोऽस्मि देववन्दिते ! शुभे !,
जीविकां प्रयच्छ देवि ! देहलीपुराधिपे ! ।।(१००)

**इति श्रीयुवराजभट्टराई-रचितं देहलीपुराधिपायाः कालिकायाः वृत्तिप्राप्तिस्तोत्रं श्रीकालिकायै समर्पितमस्तु ।। स्तोता - डॉ. युवराज भट्टराई**

## संस्कृत कथा मञ्जिरी" {८}

## द्वात्रिंशत्पुत्तलिकासिंहासनम्

## " अथ विप्रमनोरथपूरणं नाम द्वितीयोपाख्यानम्"(२)

तच्छुत्वा राजा स्वयं देवतां स्मृत्वा होमकुण्डे आहुतिम् अक्षिपत् ।तदाऽपि देवी प्रसन्ना नाभूत । तदनन्तरं राजा स्वशिरः कमलाहुतिं दास्यामि इति बुद्ध्या यावत् कण्ठे खड्गं सन्दधाति, तावदन्तराले देवता खड्गं धृत्वा अवादीत्-- भो राजन् ! प्रसन्नाऽस्मि वरं वृणीष्व । राज्ञा उक्तं-- भो देवी ! किस्मादपि परमानन्दसन्दीपनमस्ति वरप्रदानं यत् यस्याः सन्ततस्मरणेन विधूतकल्मषाः योगिनो यान्ति संसृतिक्लेशनाटकविडम्बन-निर्वहणं सा त्वं मादृशजनस्य नयनपथमधिगता सस्नेहमाभाषसे ? तत् केवलं कुतूहलतया पृच्छयसे किमपि-- ब्राह्मणोऽयं बहुकालं हवनं करोति, नापराध्यति कस्मैचित्,न चापि नियमात् स्खलितः, तथापि अस्मिन् किमर्थं न प्रसन्ना भवसि ? मम एव वा कः तथाविधः अर्हणाप्रकारः, येन शीघ्रं प्रसन्नाऽसि? तयोक्तं -- भो राजन् ! जपसरणिमुल्लङ्क्य हवनम् अयं करोति, अपि तु अस्य चेतसि भावो नास्ति अतः प्रसन्ना न भवामि । यथा--

" न काष्ठे विद्यते देवो न पाषाणे न मृन्मये ।
भावे हि विद्यते देवस्तस्माङ्भावो हि कारणम् ।।" इति।

राजा अवदत्-- यदि मम प्रसन्ना जाताऽसि,तर्हि अस्य ब्राह्मणस्य मनोरथान् पूरय । साऽब्रवीत्-- भो राजन्! परोपकारी महाद्रुम इव स्वदेहकष्टं सहित्वा परश्रमोच्छेदं करोषि? एवं राजानं स्तुत्वा ब्राह्मणस्य मनोरथं पूरयति स्म । राजाऽपि स्वपुरीमगात् ।

इमां कथां कथयित्वा पुत्तलिका भोजमवदत्--राजान् एवंविधं धैर्य्यं विद्यते चेत्, तर्ह्यस्मिन् सिंहासने समुपविश । राजा तूष्णीमासीत्।

**डा वर्षा प्रकाश टोणगांवकर**
**पुणे / महाराष्ट्रम्**



## वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये!

**काव्या-** नमस्ते नन्दिनि! प्रथमं खगोलवार्ता श्रूयताम्। खगोलशास्त्रज्ञैः अन्तरिक्षे धावत् किञ्चन महाकृष्णविवरं दृष्टम्। तेन गमनमार्गे नूतननक्षत्राणां पङ्क्तिः सृष्टा!

**नन्दिनी-** अहो! एषा वार्ता तु अतीव अद्भुता। इदानीम् एका शुभवार्ता श्रूयताम्। नववर्षेभ्यः पूर्वं चौरैः चोरितः कश्चन शुकः पुनः स्वामिना प्राप्तः!

**काव्या-** नववर्षानन्तरं शुकस्य प्राप्तिः अतीव सन्तोषाय! परं कैश्चित् जनैः व्यर्थं कष्टं दीयते। पोलैण्ड-देशे एकेन उपहासिना गृहेषु अयाचितानि पिज्जा-खाद्यानि प्रेषितानि। सः धूर्तः इदानीम् आरक्षकैः गृहीतः। तस्मै अष्टवर्षपर्यन्तं कारावास-दण्डः दीयेत!

**नन्दिनी-** सत्यम्, तादृशं दुष्कृत्यं तु दण्डनीयम् एव। अन्या एका हास्यास्पदा वार्ता मलयेशिया-देशात् श्रुता। 'पुरातन-मानवैः आकाशे डीयते स्म' इति कथयन्ती एका प्राध्यापिका विश्वविद्यालयेन पदात् निष्कासिता!

**काव्या-** विना पक्षैः मानवानां डयनं खलु असम्भवम्! अतः सा निष्कासिता अस्ति। अद्यतन्यः विचित्राः वार्ताः अत्रैव समाप्ताः।

**नन्दिनी-** अस्तु, धन्यवादः! श्वः पुनर्मेलिष्यामः।

-ईदर-धीरजः

# यज्ञेन संस्कृतसप्ताहस्य शुभारम्भः संस्कृतभाषा एव अस्माकं संस्कृतेः संपोषिका : आचार्यः हर्षपतिः घिल्डियालः






देहरादूनम्। संस्कृतभारती-देहरादूनम् तथा उत्तराखण्ड-पुरोहितसमाजस्य संयुक्ततत्त्वावधाने मङ्गलवासरे देहरादूनस्य झण्डाबाजारस्थिते तडागस्थे रामेश्वरमहादेवमन्दिरे यज्ञस्य माध्यमेन संस्कृतसप्ताहस्य शुभारम्भः कृतः। संस्कृतभाषायाः प्रचार-प्रसाराय तथा जनसामान्येषु संस्कृतभाषां प्रति अनुरागस्य जागरणाय आचरिते संस्कृतसप्ताहे "संस्कृतभारतनिर्माणं समर्थभारतसोपानम्" इति ध्येयवाक्येन आयोज्यते।

कार्यक्रमस्य अध्यक्षतां कुर्वन् उत्तराखण्ड-पुरोहितसमाजस्य अध्यक्षः आचार्यः हर्षपतिः घिल्डियालः अवदत् यत् संस्कृतभाषा अस्माकं संस्कृतेः संपोषिका अस्ति। संस्कृतभाषायाः संरक्षण-संवर्धनाय संस्कृतभारतीसंस्थया क्रियमाणानां कार्याणां प्रशंसां कुर्वन् सः अवदत् यत् उत्तराखण्ड-पुरोहितसमाजः संस्कृतस्य प्रचार-प्रसारस्य अस्मिन् अभियाने संस्कृतभारत्या सह स्कन्धेन स्कन्धं मेलयित्वा कार्यं करिष्यति। सः संस्कृतभारत्याः कार्यकर्तृभ्यः सम्मानं कृतज्ञतां च प्रकटयन् संस्कृतसप्ताहस्य सफलायोजनाय शुभकामनाः अयच्छत्। अस्मिन् अवसरे संस्कृतभारत्याः प्रान्तश्लोकशिक्षणप्रमुखः डॉ. नवीनजसोलाः संस्कृतभाषायाः व्यावहारिकतायाः विषये प्रकाशं क्षिपन् अवदत् यत् संस्कृतभाषा केवलं धार्मिकेषु आध्यात्मिकेषु च विषयेषु सीमिता भाषा नास्ति, अपितु दैनन्दिनजीवनेऽपि तस्याः सहजः प्रयोगः कर्तुं शक्यते। संस्कृतभाषायाः प्रति जनमानसे रुचेः वर्धनाय सामूहिकप्रयत्नानाम् आवश्यकता अस्ति इति सः बलं दत्तवान्।देहरादूनविभागस्य संयोजकः डॉ. प्रदीपः सेमवालः संस्कृतसप्ताहस्य उद्देश्यानां विविधकार्यक्रमाणां च विषये सूचनां दत्त्वा अवदत् यत् संस्कृतसप्ताहः संस्कृतभाषां जनभाषारूपेण प्रतिष्ठापयितुं तथा अधिकाधिकजनान् संस्कृतेन सह योजयितुं महत्त्वपूर्णः अवसरः अस्ति। आयोजनस्य सहयोगाय उत्तराखण्ड-पुरोहितसमाजस्य पदाधिकारिभ्यः कार्यकर्तृभ्यश्च सः आभारं प्रकटितवान्। कार्यक्रमे उपस्थितानां उत्तराखण्ड-पुरोहितसमाजस्य सर्वेषां पदाधिकारिणां कार्यकर्तृणां च सहयोगाय संस्कृतभारत्याः पक्षतः धन्यवादः कृतज्ञता च प्रकटिता। तत्रैव सत्रसञ्चालकः कृष्णानन्दनौडियालः अपि संस्कृतभारत्या संस्कृतभाषायाः संरक्षण-संवर्धन-प्रचार-प्रसाराय क्रियमाणानां प्रयत्नानां प्रशंसां कुर्वन् संस्थायाः कार्यकर्तृभ्यः धन्यवादं सम्मानं च प्रकटितवान्। उभयोः संस्थयोः पदाधिकारिभिः संस्कृतभाषायाः व्यापकप्रचार-प्रसाराय परस्परसहयोगेन समन्वयेन च अग्रेऽपि कार्यं कर्तुं संकल्पः व्यक्तः।कार्यक्रमस्य शुभारम्भः मङ्गलदीपप्रज्वलनेन यज्ञेन च अभवत्। यज्ञे उपस्थितैः सर्वैः संस्कृतभाषायाः भारतीयसंस्कृतेश्च संरक्षण-संवर्धनस्य संकल्पः कृतः। कार्यक्रमस्य समापनं शान्तिमन्त्रस्य सामूहिकेन उच्चारणेन अभवत्। अस्मिन् अवसरे प्रान्तकुटुम्बकशिक्षणप्रमुखः नागेन्द्रदत्तः व्यासः, जनपदमन्त्री माधवः पौडेलः, संरक्षकः कलशानन्दः, उपाध्यक्षः (पु.स.) सुभाषः डिमरी, संरक्षकः विनोदः कोठारी, धीरजः मैठाणी, सुबोधः उनियालः, राजेशः द्विवेदी, डॉ. बीना पुरोहिता, उर्मिला शाक्ता, सुबोधः सेमवालः, कवीन्द्रः बडोनी, विकासः भट्टः, अजयः नौटियालः, आचार्यः मनोजः, इंद्रमणिपंतः, इत्यादयः संस्कृतभारती-देहरादूनम् तथा उत्तराखण्ड-पुरोहितसमाजस्य अनेके कार्यकर्तारः उपस्थिताः आसन्। आयोजकैः संस्कृतप्रेमिभ्यः नागरिकेभ्यः, पुरोहितेभ्यः, शिक्षकेभ्यः, विद्यार्थिभ्यः सामाजिककार्यकर्तृभ्यश्च संस्कृतसप्ताहस्य विभिन्नेषु कार्यक्रमेषु सहभागितां कृत्वा संस्कृतभाषायाः प्रचार-प्रसारस्य अस्य अभियानस्य सफलतायै योगदानं दातुम् आह्वानं कृतम्।

## एलोरा-गुहाः- शिलायां लिखितः सहिष्णुतायाः सन्देशः

भारतीयसंस्कृतेः वैशिष्ट्यं केवलं तस्याः प्राचीनतायां निहितं नास्ति, अपि तु विविधतायाः सह अस्तित्वे अपि निहितम् अस्ति। महाराष्ट्रराज्ये स्थिताः एलोरागुहाः अस्याः सांस्कृतिकदृष्टेः साक्षात् प्रतीकभूताः सन्ति। प्रायः २ कि.मी. दीर्घे बेसाल्टशिलाप्रदेशे निर्मिताः ३४ गुहाः अत्र सन्ति। एताः गुहाः मुख्यतः षष्ठात् दशमशताब्द्याः मध्यकालीन- भारतीय- स्थापत्यस्य विकासं दर्शयन्ति। एलोरायाः विशेषता तस्याः संख्यायां न, अपि तु तस्याः विविधतायां वर्तते। १२ गुहाः बौद्धसम्बद्धाः, १७ गुहाः हिन्दूधर्मसम्बद्धाः, ५ गुहाः जैनसम्बद्धाः सन्ति। एकस्मिन् एव क्षेत्रे त्रयाणां धार्मिक- परम्पराणां स्थापत्यं सहस्रवर्षपूर्वं विकसितम् अभवत्। अत्र गुहासंख्या १६, प्रसिद्धं कैलासमन्दिरम्, विशेषतया उल्लेखनीयम् अस्ति। एतत् एकस्मात् एव शिलाखण्डात् उत्कीर्णं विशालं एकशिलामन्दिरम् अस्ति। यूनेस्को-संस्था अपि अस्य निर्माणकार्यं अद्वितीयं तान्त्रिक-कौशलं मन्यते। आधुनिकयुगे अस्माकं समीपे सङ्गणकाः, यन्त्राणि, 3D-मॉडलिङ्ग-प्रौद्योगिकी च सन्ति; किन्तु तदा शिल्पिभिः केवलं मानवीयकौशलस्य, गणनायाः, धैर्यस्य च साहाय्येन शिलायां एतादृशं स्थापत्यवैभवं निर्मितम्। अतः एलोरा आधुनिकप्रौद्योगिक्यै अपि मौनं प्रश्नं पृच्छति- "साधनानि वर्धितानि, किं तु सृजनशीलता तदनुरूपं वर्धिता?" एलोरायाः निर्माणकार्यं एकस्मिन् काले न सम्पन्नम् अभवत्। यूनेस्को-अनुसारं तत्र शिलाखननस्य प्रक्रिया विभिन्नेषु चरणेषु षष्ठात् द्वादशशताब्द्याः पर्यन्तं प्रवृत्ता। बौद्धगुहाः १–१२, ब्राह्मणीयगुहाः १३–२९, जैनगुहाः ३०–३४ इति प्रमुखविभागेषु विभक्ताः सन्ति। अद्यतनसमाजे अस्य तथ्यस्य विशेषं महत्त्वम् अस्ति। यदा सम्प्रदायगतविभेदाः, असहिष्णुता, सामाजिकध्रुवीकरणं च चर्चायाः विषयाः भवन्ति, तदा ३४ गुहाः अस्मभ्यं सहअस्तित्वस्य प्राचीनं प्रत्यक्षप्रमाणं दर्शयन्ति। बौद्धः, हिन्दूः, जैनः च- त्रयः सम्प्रदायाः एकस्मिन् एव भौगोलिकक्षेत्रे स्वकीयां आध्यात्मिक-कलात्मकपरम्परां विकसितवन्तः। अतः एलोरा केवलं पुरातत्त्वीयं स्मारकं न, अपि तु बहुलतावादस्य शिलालेखः अस्ति। परन्तु प्रश्नः अस्ति- वयम् अस्याः धरोहरस्य प्रति कियत् उत्तरदायिनः स्मः? १९८३ तमे वर्षे एलोरा यूनेस्को- विश्वधरोहरस्थलरूपेण सूचीकृता। विश्वस्तरीयमान्यता प्राप्ता, किन्तु केवलं यूनेस्को-सूच्यां नामाङ्कनं संरक्षणस्य अन्तिमं लक्ष्यं न भवितुम् अर्हति। पर्यटकानां संख्या वर्धते चेत् तदनुसारं संरक्षणव्यवस्था, पर्यावरणप्रबन्धनम्, वैज्ञानिकसंरक्षणं च अपि सुदृढं भवेत्। यूनेस्को स्वयं पर्यटकप्रबन्धनम्, पर्यावरणीयप्रभावाः, शिलायां स्रवणं तथा विदारणं च संरक्षणस्य सम्भावितचुनौतिरूपेण निर्दिशति। आधुनिकप्रौद्योगिकी अस्मिन् क्षेत्रे नूतनं योगदानं दातुं शक्नोति। 3D-स्कैनिङ्ग, डिजिटल- अभिलेखनम्, आभासीपर्यटनम्, कृत्रिमबुद्धिम् आधृतानि शैक्षिकसाधनानि च उपयोगित्वा एलोरायाः स्थापत्यं विश्वस्य युवापीढ्यै अधिकसुलभं कर्तुं शक्यते। किन्तु डिजिटलचित्रं वास्तविकशिल्पस्य स्थानं न गृह्णीयात्; तत् संरक्षणस्य, अध्ययनस्य, जनजागरूकतायाः च साधनं भवेत्।एलोरा अस्मान् केवलं अतीतं दर्शयति इति न; सा भविष्यस्य कृते अपि उत्तरदायित्वं निर्दिशति। ३४ गुहाः, २ कि.मी. विस्तारः, त्रयः धार्मिकपरम्पराः, शताब्दीनां निर्माणपरम्परा, १९८३ तमे वर्षे विश्वधरोहरमान्यता एते सर्वे अङ्काः वस्तुतः एकमेव महत्त्वपूर्णं तथ्यं कथयन्तिः सभ्यतायाः महानता केवलं तस्याः प्राचीनतया न मीयते, अपि तु सा स्वकीयां धरोहरं कियत् बुद्धिपूर्वकं रक्षति इत्यनेन अपि मीयते। अतः एलोरायाः पुरतः स्थित्वा अस्माभिः केवलं "कियत् सुन्दरम्!" इति न वक्तव्यम्। अपि तु प्रश्नः भवेत् "अस्माभिः अद्य किं निर्मीयते, यत् भविष्यस्य मानवाः सहस्रवर्षानन्तरम् अपि विस्मयेन द्रक्ष्यन्ति?" शिल्पिनां हस्तेषु यः पाषाणः कालजयी कृतः, स एव अस्मान् अद्य सृजन-शीलतायाः, सहिष्णुतायाः, संरक्षणस्य च नूतनं पाठं पाठयति।



- देवेशविद्यार्थी 'संस्कृतभाषी'